Digitized by Arya Samaj Foundation Chennai and eGangotri

BAL SANSKRIT

1972 G. K. U.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

aj Foundation C

n. Gurukul Kang

113505
Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्षः २३

बालसंस्कृतम्

अङ्कः २

विजयदिवसाङ्कः

सम्पादकः— वैद्य रामस्वरूपशास्त्री आयुर्वेदाचार्यः

वार्षिकं शुल्कं सप्त रूप्यकम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

बालसंस्कृतकार्यालयः लालबहादुरशास्त्री मार्ग, घाटकोपर, ८६

Digitized by Arya Samaj Foundation Chennai and eGangotri

ये न मित्रस्य दुःखेन दुखिनः सन्ति मानुषाः ।
ते नरा नरकं यान्ति महापातकभागिनः ॥

तुलसीदासः

हृदीश्वरं दृशं लक्ष्ये निधाय बलमात्मनि ।
सिद्धामाप दयानन्दो देशकल्याणकल्पनाम् ॥

अरविन्दो घोषः

सानुकम्पा दरिद्रेषु पतितेषु पामरेष्वपि।
ईश्वरकृपया गुप्ता धीरा भारतवासिनः ॥
समुद्धाराय देशस्य समाजस्य समृद्धये ।
वैशिष्ट्याय मिथः प्रीता भवामः सजवा वयम् ॥

स्वामीविवेकानन्दः

संस्कृतप्रचाराय शुभाभिः कामनाभिः साकम्
१८५ वालकेश्वरमार्गे तीनबत्तीप्राङ्गणे मुम्बापुर्यां ६, स्थितमिष्टान्नापणवतः

प्रज्ञावी श्रीचन्दूहलवायी महाभागस्य

प्रतिष्ठितं पण्यम्, दूरध्वनिः ३६४७७७ ३६३६२५

शाखाः-		शाखाः-	
जवेरी बाजारे, दूरध्वनिः	३१३७२९	वर्ल्याम्, दूरध्वनिः	३७२७९६
ग्रान्टरोडे ,,	३५१७८०	शिवे ,,	४७३८८९
कुलावायाम् ,,	२१३८१३	ठाकुरद्वारे,,	३५६५५६
दादरे ,,	४४२२०१२	दुर्गे ,,	२५३९२१,२२
चर्चगेट- सूर्योदयभाण्डारे		घाटकोपरे (पश्चिमे)	

९ सूर्योदयसम्भारालयं चर्चगेटस्थम् २९१९७९
निर्माणशाला-चन्दूभवनम्, ग्राण्टरोड महामार्गे, मुम्बापुर्याम् ७
दूरध्वनि : ३७२६२८, ३७०७३३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

—०—

हंहो भारतीयतायां भक्तिमन्तो भवन्तः ।

धीराणां वीराणां मनस्विनां परोपकारपरायणानां परमोदात्तानां भारतीनामस्माकं शान्ता दान्ता सरला च स्वकीया संस्कृतिः काचिदपूर्वैव सर्वलोकातिशायिनी वर्तते सुमान्या जगताम् ।

भारतीयास्ते त्रिषु धीराः रणाङ्गे वीराः, मनस्विनः सदैव परोपकारपरायणाश्चासन् सन्ति च । ते जीवितुं मर्तुं च जानन्ति तथा हि—

यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा ।
अनुकम्प्योऽनुकम्प्यश्च स जातः स च जीवति ॥

अस्मिन् भारत पाकिस्तानयोर्द्वयोर्युद्धे न भारतस्य कोऽपि स्वार्थ आसीत् । पाकहतेषु निर्वासितेषु दुर्गतेषु शरणार्थिवङ्गालोकेषु मनुष्यकर्तव्योचिता दयामात्रं बहुव्यये युद्धेऽवतारयति स्म भारतम् ।

संग्रामेऽस्मिन् शत्रुगतनीशतवान्तगाभ्रप्रपातं वारयद्भिः स्वभाववीरैर्भारतीयैर्लोकोत्तरं शौर्यं मनस्विता प्राणबलिदानं शालीनत्वं चोदाहृतम् । को नाऽऽवर्जितो भवत्यनेन विजयेन स्वेषां शूराणां यूनाम् । अस्मिन् युद्धावसरे दत्त्वा परमौदार्येण धनानि धनिकैरपि संमार्जितं कार्पण्यकलङ्कम् ।

औदार्येण धनाढ्यैः दत्त्वा वित्तानि बङ्गरक्षायै ।
दूषणमपि धनभाजां भूषणरक्षं विनिक्षिप्तम् ॥

अशेषया जनतयापि समर्थोऽर्थयोगो दत्तो विहाय कार्पण्यम् । श्रमिकजनैरपि प्रदत्तो योगोऽत्र यथाबलम् ।

अनेन समवायोचितेन योगेन रक्षितो प्रतिवेशी बंगालदेशः अस्माकीनैः शालीनैः सैनिकैः, जिताश्च मानिनः पाकाः ।

अनेन विजयेन पाकानां प्रच्छन्नमित्राणि आङ्गलाः, प्रत्यक्षमित्राणि चीनाः, आमेरिकाश्चापि सञ्जातभयप्रकम्पाः सन्ति । इदानीं दूरदेशेष्वपि भारतस्य प्रतापः बलमौदार्यं च वर्धन्ते, अभिनन्दयामो वयं भारतीयं लोकम् ।

सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वन्द्यः स पुसां त्रिदशाभिनन्द्यः
कारुण्य- पुण्योपचयक्रियाभिः ।
संसारसारत्वमुपैति यस्य
परोपकाराभरणं शरीरम् ॥

शुभाभिराकांक्षाभिः सार्धम्

दी वेष्टकोस्ट पेपर मिल्स लि.

सुदर्शनचक्रचिह्नितस्य विशिष्टकर्गलस्य निर्मातारः

पञ्जीकृतं नियोगस्थानम्—

वाउडी मार्गे स्थितं श्रीनिवासभवनम्, मुम्बापुर्याम् १

निर्माणकार्यस्थानम्—

डाण्डेली, उत्तरकनारा-प्रान्ते मैसूरराज्यम्

भाषासु मधुरा दिव्या पवित्रा सुरभारती
भारतराष्ट्रे शर्करानिर्मातृषु प्रत्येकक्षेत्रमिक्षूत्पादने
शर्करानिर्माणे च अग्रतः सराणामस्माकं राष्ट्रोत्कर्षे
राष्ट्रविभवे च श्रेयोभागिताऽभिमानास्पदम्

श्रीगोदावरी शर्करोत्पादनस्वामिसङ्घः

दी गोदावरी शुगरमिल्स लि.

फजलभाई भवनम्

कार्यदर्शी प्रतिनिधिः—

के. जे. सोमय्या एण्ड सन्स प्रायवेट लि.

४५-४७ महात्मा गान्धिमार्गे, मुम्बापुर्याम्-१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

113505
Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

दिल्ली-शिक्षा-निदेशालयेन राजस्थान-शिक्षा-विभागेन च मान्यता-प्राप्तम्

सरस्वती श्रुतिमहती महीयताम्

113505

बालसंस्कृतम्

पुरे ग्रामे गृहे कुट्यां बाले वृद्धे युवस्वपि ।
संस्कृतस्य प्रचाराय प्रभूयाद् बालसंस्कृतम् ॥

वर्षम् २३] सम्वत् २०२८ वि. फाल्गुनः, फरवरी १९७२ खि. [अङ्कः २

अथर्ववेदे संज्ञानसूक्तम्

--०--

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः ।
अन्योन्यमभिहर्यत वत्सं जातमिवाघ्न्याः ॥१॥
अनुव्रतः पितुः पुत्रो माता भवतु संमनाः ।
जायापत्ये मधुमतीं वाचं वदतु शान्तिवाम् ॥२॥
मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ॥३॥
ज्यायस्वन्तश्चित्तिनो मा वियौष्ट ।
संराधयन्तः सधुराश्चरन्तः ॥४॥
अन्योऽन्यस्मै वल्गु वदन्त एत ।
सध्रीचीनान् वः संमनसस्कृणोमि ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभयप्रदानम्

शरणागतस्य रक्षणम्, आर्याणां भारतीयानां परम्परागतं व्रतम्। पुरातनाः क्षत्रिया राजानः चक्रवर्तिनश्च जितानां शत्रूणां रक्षणमकुर्वन्, प्रायच्छन् च तेभ्योऽभयदानम्। युद्धकालेऽपि ते शत्रोः स्त्रीणां बालानां वधं नाकुर्वन्, इत्यमस्माकमितिहासः प्रमाणयति।

सृष्टेः प्रारम्भेऽपि देवराजेन इन्द्रेण सह मरुद्गणानां युद्धोऽभूत्। तस्मिन् विजेता देवेन्द्रः जितेभ्यस्तेभ्योऽभयं देवत्वं यज्ञभागं चापि प्राददात्। मर्यादापुरुषोत्तमस्य भगवतः श्रीरामस्य तु व्रतम्—

सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम॥

शरणागताय सुग्रीवाय स शरणं ददौ, राज्यं मैत्रीभावं चापि। लङ्काकाण्डे रावणस्य भ्राता विभीषणः श्रीरामस्य शरणमागच्छत्, भगवान् श्रीरामः तस्मै अभयं दत्वा, त्वरित एव तं लङ्केश्वरं कृतवान्। सेनापतयः सुग्रीवादयः शत्रुसहोदरे विभीषणे शङ्किता अभवन्। तदवगत्य- स तान् अब्रवीत्- हे वीराः- शरणातेभ्योऽभयं ददामि, इति मम व्रतम्। रावणोऽपि यदि शरणमागच्छेत् तस्मा अपि दद्यामहमभयम्, सति सन्धौ च, अयोध्यायाः राज्यमपि।

भगवान् श्रीकृष्णोऽपि गीतायां शरणागतस्य रक्षणप्रतिज्ञां करोति स्म—

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुच॥

इन्द्रप्रकोपे व्रजवासिनः भगवन्तं श्रीकृष्णं शरणमगच्छन् भगवानपि सप्ताहं यावत् गोवर्धनं पर्वतं करे धृत्वा तेषां रक्षणमकरोत्, [illegible]। [illegible] भारतीयवीराणां पार-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

म्परिकः संस्कारः । पृथिवीराजः मुहम्मदगोरीं विजित्य, शरणागताय तस्मै अभयमकरोत् । छत्रपतिः शिवराजः युवतिं शत्रुपुत्रीं गौहरजानसुन्दरीम्, 'मातृवत् परदारेषु, इत्युक्त्वा पूजितान्, दत्तवांश्च तस्यै उपहारमभयं च । पुरा यवनेभ्यः पराजिताः पीडिता आतङ्कितश्च पारसिनो भारतं शरमागच्छन् । परमोदारा भारतीया नृपालास्तेभ्यो रक्षणमभयं च प्रायच्छन् ।

व्याघ्रा इव पलायितारः आहियाखानस्य राक्षसवृत्तयः सैनिका बंगदेशे निरपराधिनो जनान् स्त्रीः पुरुषान् बालकान् वृद्धानपि च निर्दयमघ्नन् । त्रस्ता जनाः स्वदेशं बंगालं विहाय भारतं शरणमागच्छन् । भारतस्तेभ्योऽददात् अभयं बहुव्ययं रक्षणं चापि ।

यवनानां यीशायिनां च कापि स्वकीया परम्परागता संस्कृतिरेव नास्ति । विद्वषवन्तस्ते स्वस्थाया महत्याः भारतीयसंस्कृतेः पदमप्राप्य लज्जां विहाय विरोधमाचरन्ति । ते बर्बराः सन्ति । स्वल्पायामपि शक्तौ सत्यां ते बलात् स्वार्थाय प्रवर्तन्ते । न ते पुण्यं पापं वा पश्यन्ति, स्वकर्मणः प्रतिकूलं फलं चापि । ते मित्रद्रोहमाचरन्ति, निघ्नन्ति च विश्वासम् । छलेन बलेन प्रलोभनेन कारयन्ति च बहुत्र धर्मपरिवर्तनं हिन्दुग्रामनिवासिनाम् । यदा तदा सामूहिकीं हत्यां चापि कुर्वाणास्ते धर्मस्य सम्प्रदायस्य वा नाम्नि बहूनि पापानि समाचरन्ति । यहूदीनां रक्तेन रञ्जितं वर्तते खलु बर्बराणां यीशायिनामितिहासः ।

वर्षाणां चतुःशतीपूर्वं गोवायां यीशायिनः सार्वजनीनां हत्यां समाचरन् । सहस्रशो शिशून् स्त्रीः यूनः वृद्धान् जनानपि तेऽमारयन् । बहूनि देवमन्दिराणि भङ्क्त्वा गिरिजागृहाणि तेऽकारयन्, दुर्बलानां हिन्दूनां बलात् धर्मान्तरं चापि तेऽकारयन् ।

हिटलरो निरपराधानां लक्षशो जनानां प्राणान् अगृह्णात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोरियायां लायोसे तिब्बते च दुर्बलानां रक्तस्य नद्योऽवहन् । वियतनामस्तु वर्ततेऽधुनापि वधक्षेत्रम् ।

धर्मान्धैः मुहम्मदस्यानुयायिभिः स्वधर्मवृद्धये बहुत्र सामूहिकी हत्या कृतेति इतिहासप्रमाणम् । दिल्ल्यां यवनाः गुरोः तेगबहादुरस्य शिरः कायादपातयन् । गुरोः गोविन्दसिंहस्य बालकौ पुत्रौ जीवन्तौ एव भित्त्यां समारोप्य मारितौ । बन्दावैरागी चापि दुर्मारं मारितो बर्बरैर्यवनैः । भारतस्य स्वतन्त्रतारम्भे नोवाखाल्यामत्याचारा अपि न विस्मरणीयाः सन्ति ।

इदानीं बंगालदेशे निरपराधिनां लोकानां वधो न कस्य हृत्कम्पमातनोति ।

एभिरुदाहरणै भारते प्रविष्टा वैदेशिकाः स्वार्थाय कांस्कान् अपराधान् नाकुर्वन् , इति प्रकटी भवति ।

भारतीयाः प्रजाः, देशस्य रक्षका योद्धारोऽपि च उदाराः आसन् सन्ति च । भारतस्य राजानो नेतारश्चापि सदैव शान्ता दान्ता वीराश्चासन् ।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु न कश्चिद् दुःखभाग्भवेत् ॥

इत्येषाऽऽसीत् सुसदृशी विचारधारा तेषाम् । इदानीमपि सैव सुप्राचीना संस्कृतिः जागर्ति भारतीयेषु जनेषु । ते दीनहीनमलीनां जनानामुद्धारका भवन्ति । सन्ति ते गोब्राह्मणसाधुषु श्रद्धावन्तः शौर्यवीर्यधैर्यसम्पन्नाः सुचरित्रा भारतीयाः आधुनातनाः सैनिका अपि स्वदेशस्य रक्षायै प्रदत्तप्राणबलयोऽपि शरणागतेभ्योऽभयप्रदानं कुर्वन्ति ।

भारत-पाकसंग्रामेऽस्मिन् विजयिनोऽपि धन्या अस्माकं सेनापतयः एकपक्षं युद्धसमाप्तिं घोषयित्वा सहस्राणां पाकानां प्राणान् अरक्षन् , तेभ्यो रक्षणं दत्त्वाऽभयं च प्रायच्छन् । सत्यशीलेभ्यस्तेभ्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुतरामभयं दास्यति भगवान् परमेश्वरः । इत्थं च गायन्ति शास्त्राण्य-
स्माकमभयप्रदानस्य महिमानम्—

न गोप्रदानं न महीप्रदानं
न चान्नदानं न सुवर्णदानम् ।
यथा वदन्तीह बुधाः प्रधानाः
सर्वेषु दानेष्वभयप्रदानम् ॥

—०—

नित्यमर्चामि संस्कृतम्

(१)

मदीया संस्कृतं माता संस्कृतं च पिता मम ।
गुरुर्मे संस्कृतं शश्वद् बन्धुरेव हि संस्कृतम् ॥

(२)

संस्कृतं परमं मित्रं रक्षकं मेऽपि संस्कृतम् ।
संस्कृतं कामधुग्धेनुः संस्कृतं मामकं धनम् ॥

(३)

संस्कृतं चास्ति मे धर्मः मम कर्मापि संस्कृतम् ।
जीवनं संस्कृतं चास्ति जीवनस्य फलं तथा ॥

(४)

आददे संस्कृतस्यार्थे प्रददे संस्कृताय च ।
अधीये संस्कृतस्यार्थे प्रयते संस्कृताय मे ॥

(५)

अशनं संस्कृतस्यार्थे वमनं संस्कृतं मम ।
संस्कृतस्य कृते पूजा नित्यमर्चामि संस्कृतम् ॥

* * *

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं करिष्यन्ति शत्रवः

नेतॄणां च नराणां च केवलं तुल्यमूर्तयः ।
धैर्यं नेतुराधिक्यं क्षमा दानं पराक्रमः ॥

प्रजां न रञ्जयेत् यस्तु नेता रक्षादिभिर्गुणैः ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥

प्रजां यः पीडयेन्नेता तस्य नाशः प्रजायते ।
अहिया च अय्यूबश्च हिटलरश्च निदर्शनम् ॥

अजामित्र प्रजां हन्यात् यो नेताऽऽमिषलोभतः ।
तस्यैका जायते वृत्तः द्वितीया न कदाचन ॥

प्रजापीडनसंतापात् समुद्भूतो हुताशनः ।
नेतुः कुलं श्रियं प्राणान् न हत्वा विनिवर्तते ॥

यस्मिन् राष्ट्रे च देशे च सम्यङ् नेता न वर्तते ।
अकर्णधारा जलधौ तस्य नौका निमज्जति ॥

नेतारं विना प्रकृतिः समृद्धाऽपि न जीवति ।
अपि धन्वतरिर्वैद्यः किं करोति गतायुषि ॥

नेतरि जीवलोकोऽयं राजमाने विराजते ।
उदेत्युदीयमाने च रवाविव सरोरुहम् ॥

मां त्वं भुट्टो बलं प्राप्य बाधिष्ठा दुर्बलां प्रजाम् ।
दुर्बलशापदग्धानां सर्वनाशः प्रजायते ॥

जिन्नायः दुर्गतिं पश्य हिंसां पश्य लियाकतेः ।
सुहरावर्दिनो मृत्युमयूबपतनं पुनः ॥

विनाशस्तव पाकस्य भविष्यति भविष्यति ।
भुट्टो त्वं प्राणरक्षायै पलायस्व दिगन्तरम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यानि मिथ्याभिभूतानां पतन्त्यश्रूणि रोदताम्।
तानि संतापकान् घ्नन्ति बलिनः सधनानपि॥

हन्ताऽसि त्वं बंगानां पाकानां च विनाशकः।
निर्दोषाणां च विक्रोशाः त्वां धक्ष्यन्ति न संशयः॥

कितवास्त्वां प्रशंसन्ति त्वां प्रशंसन्ति वञ्चकाः।
चीनास्त्वां प्रशंसन्ति भुट्टो त्वं हि नराधमः॥

स जीवति भारते गान्धिः नेहरूरपि जीवति।
राजेन्द्रश्च पटैलश्च शास्त्री लालबहादुरः॥

जीवति इन्दिरागान्धिरिन्दिरेव मता जनैः।
बंगदेशः स्वतन्त्रोऽस्ति मुजीबो यत्र राजते॥

अस्माकं सैनिकाः सर्वे नीतिमन्तः सुबुद्धयः।
शौर्यधैर्यबलैर्युक्ताः देशभक्ताः स्वसम्मताः॥

भारतस्य नराः सर्वे शूराः सन्ति गृहे गृहे।
लोके चैकतामस्माकं सभ्याः सन्ति प्रजाजनः॥

जानीहि भुट्टो सत्यं हे भाओ हे निकसनः।
भारतं भारतं नूनं यूयं केवलकेवलाः॥

बलं भिक्षयसे भुट्टो यासि चीनममेरिकाम्।
स्वदेशं द्वेष्टि त्वं पाकं स्वजातिं चापि यौवनीम्॥

आत्मानं द्वेषि भुट्टोस्त्वं नहि जीवितुमर्हसि।
जीवन्ति ह्युपकर्तारः नापकारकराः क्वचित्॥

भारतो बंगदेशस्य कल्याणमकरोद्यतः।
नहि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति॥

आयाहि पक्षे बंगस्य पाकिस्तानं विहाय त्वम्।
बंगदेशः स्वतन्त्रोऽस्ति मुजीबः प्रभविष्यति॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेतारो हि सुनेतारो मन्त्रिणोऽपि सुमन्त्रिणः ।
सैनिकाश्च सुयोद्धारो भारते सन्ति साम्प्रतम् ॥
सन्ति सुलिष्टाः सर्वे भारतस्य प्रजाजनाः ।
सुदृढा वर्तते नीतिः किं करिष्यन्ति शत्रवः ॥

मातृभूमिप्रशस्तिः

लेखकः– त्रिभुवननाथ शास्त्री
गणपतियार श्रीनगर (कश्मीर)

मातस्त्वदीयभक्तिं मनसा न विस्मरेयम् ।
गांङ्गं जलं त्वदीयं मधुरं मनोनुकूलम् ।
तारागणस्य माला रुचिरे त्वदीयकण्ठे ।
चन्द्रो विभाति नित्यं मुखमण्डले त्वदीये ।
शीर्षं तव प्रशस्तं विबुधैरलंकृतं यत् ।
शैवा वसन्ति यत्र शिवशक्तिज्ञानयुक्ताः ।
मातस्त्वदीयक्रोडे तव पुत्रकाः प्रवृद्धाः ।
बालास्त्वदीयवीराः कवयस्तथैव भक्ताः ।
नम्रास्तथैव शान्ताः समरे महाबलिष्ठाः ।
गान्धी समाःहि वीराः नेहरोः समा हि धीराः ।
लक्ष्म्याः समाःहि नार्यः भरणे सदा समर्थाः ।
झांसीश्वरी त्वदीया तव वैरिदर्पहन्त्री ।
मातर्मदीयचित्ते तव पूजनस्य वाञ्छा ।
चित्ते ममाभिलापस्तव पादक्षालनस्य ।
बोसो ददौ हि शीर्षं तव पादपद्मभक्तः ।
दानं ददामि देहं तव पादपंकजेऽहम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वसन्तः

भारतेऽस्माकं षड् ऋतवो भवन्ति। तत्र चैत्रवैशाखयोर्वसन्तः, ज्येष्ठाषाढयोर्ग्रीष्मः, श्रावणभाद्रयोर्वर्षाः, आश्विनकार्तिकयोः शरद् मार्गपौषयोः हेमन्तः, माघफाल्गुनयोश्च शिशिरः ऋतुः भवति।

इदानीं वसन्तः। अयमृतुषु प्रथमो मनोहरश्च, अत एव ऋतुराजः इत्युच्यते। सर्वं मधुरमिवाभाति मधावस्मिन्। वृक्षा नवानि पल्लवानि दधति, विलसन्ति वनराजयः, शोभते नवकिसलयैः आम्रवणम्, लताः फुल्लन्ति, सुरभीयन्ति दिगन्तराणि सहकारमञ्जरीणां सुगन्धः, प्रमोदते बकुलपंक्तिः सौरभवैभवेन, फुल्लति कर्णिकारः वर्णोत्तमानि पुष्पाणि, आमोदीकरोति मधुमल्लिका दिशामन्तराणि, विजीयते जात्या सुरभिसंसारः, विस्मरत्यात्मनं पुष्परागरक्तः निष्पत्रः पलाशः, सुरभीकुर्वन्ति पाटलावनानि दिक्चक्रम्, विलसति सहकारवनं फलसम्पदाभिः, व्यञ्जयन्ति फलाढ्यतां जम्बूतरुततयः, विनम्राः सन्ति फलभरेण दाडिमपादपाः, मदयति च माध्वीकसौरभेण जनमनांसि मधूकवनम्।

कूजन्ति पुंस्कोकिलाः, गुञ्जन्ति विकचपद्ममधुपानमत्ता द्विरेफाः गायति शुकमण्डलम्, नृत्यन्ति मयूरकामिन्यः उपवीणयति मधुकरकुलम्, आलपति च षड्जेन स्वरेण सारिकाकुलम्, पञ्चमेन च कोकिलस्त्रियः, तर्पयन्ति विविधसस्यशोभाढ्यानि क्षेत्राणि कृषकजनमनांसि, आवाति मन्दः सुगन्धः शीतलश्च पवनः। धरन्ति चेतांसि हठात् नवपल्लवपुष्पफलनेपथ्यानि दधत्यो वनलताः, स्फुरन्ति धारायन्त्राणि परितो गृहारामेषु, रमन्ते शुकशिशवः आमैराम्रफलकन्दुकैः, प्रमज्जन्ते पाठशालीया नवयुवानः पादकन्दुकक्रीडासु, सन्ति मधुसंचयनप्रसक्ता मधुकरकामिन्यः, वारविलासिनीव नवनवां शोभां बिभर्ति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वनस्थली, परिभ्रमणपथ्याः सन्ति प्रदोषाः, न चण्डं तपति मार्तण्डः, मृदुलतापमनोरमाः सन्ति दिवसाः, रमणीयाः सन्ति चन्द्रिकासनाथाश्चैत्रयामिन्यः, प्रतिक्षणमभिनवतामुपैति प्रकृतिशोभा, धनिकैश्च वसन्तोत्सवा वितन्यते। अयं पुनरिदानीम्—

वसन्तो वनशोभाभी राजते नन्दयन् जगत्।
राजेव धनशोभाभिर्ऋतुराज इति स्मृतः॥

—०—

तुलसी–मानस प्रकाशन

जीवनोपयोगी साहित्य

१	पीस आफ माइण्ड	रु. ३	२	ज्ञानसाधना	रु. २
३	संसार का सार	३	४	वेदान्त का सरल बोध	१
५	विज्ञान से ज्ञान	१	६	वेदान्त नवनीत	१.५०
७	मुमुक्षु	५	८	आध्यात्मिक पिक्टोरियल	२
९	मन की शान्ति	४	१०	मनन (मासिक) वार्षिक	४

प्राप्तिस्थानम् गुप्ता मिल्स् स्टेट, रे रोड, बम्बई-१०

आप का सुपरिचित —
देशी औषधियों का महान् उत्पादक—
श्रीवैद्यनाथ आयुर्वेद भवन प्रा॰ लि॰
कलकत्ता, पटना, झांसी, नागपुर, वाराणसी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतस्य स्वातन्त्र्यम्

साम्ना दानेन भेदेन समस्तैरथवा पृथक् ।
साधितुं प्रयते तारीन् न युद्धेन कदाचन ।।१।।
अनित्यो विजयो यस्मात् दृश्यते युद्ध्यमानयोः ।
नैकस्य नियतो लाभो हानिस्तु पक्षयोः द्वयोः ।।२।।
सामनीतिश्च सन्धिश्च नृपाणां नेतृणामपि ।
पुराऽऽसीद् भारतीयानां सर्वदा शान्तिमिच्छताम् ।।३।।
लुण्टाकविधिवेत्तारो यवना भारतेऽविशन् ।
पुरा दण्डविदो मूढा राजनीतिबहिर्मुखाः ।।४।।
लुलुण्टुर्भारतं भूयो यवनाः सर्वविधं धनम् ।
बहुधाऽऽहृत्य राजभ्यः स्वदेशमनयन् शठाः ।।५।।
गौराङ्गास्तत आगच्छन् दूरव्यापारसंविदः ।
भारते शासनं चक्रुः भेदनीतिविदांवराः ।।६।।
दक्षा दण्डे च भेदे राज्यं चक्रुः निरन्तरम् ।
भारतीयाः प्रजास्तेभ्यः स्वीयं स्वातन्त्र्यमीहिरे ।।८।।
दृढं सत्याग्रहं चक्रुः भारतीया निरन्तरम् ।
स्वीयसंस्कृतिरक्षार्थै मारयित्वा मृता बहून् ।।९।।
पाण्डेयो भक्तसिंहश्च परे शूलं प्ररोपिताः ।
मारिताश्चापि दुर्मारैः स्वराज्यं नाम ग्राहकाः ।।१०।।
सत्याग्रहं स्वराज्याय भारते हिन्दवो जनाः ।
आरभन्ताङ्गलैर्भूयो गङ्गाधरमहोदयः ।।११।।
तिलकस्तेषु मुख्योऽभूत् राजनीतिविदांवरः ।
जन्मसिद्धाधिकारो नः स्वराज्यमिति घोषकृत् ।।१२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आङ्गला राज्यकर्तारो दमं चक्रुर्यथाबलम् ।
दमनं राजपुरुषाणां स्वार्थाय ववृधे यथा ॥१३॥

सत्याग्रहोऽपि हिन्दूनां ववृधे देशमुक्तये ।
जन्मभूमेर्विमोक्षाय भक्ता युयुधिरे चिरम् ॥१४॥
जहुः प्राणान् वदन्तस्ते वन्दे भारतमातरम् ।
कांग्रेसाभिधानां ते निर्माय महतीं सभाम् ॥१५॥
नेतारः समजायन्त प्रान्ते प्रान्तेऽपृथग्मताः ।
गान्धिमोहनदासस्तु महात्मा तेषु नायकः ॥१६॥
समजायत मेधावी सर्वलोकहिते रतः ।
अभिन्नमतयः सर्वे नेतारः सप्रजा जनाः ॥१७॥
सत्याग्रहं स्वराज्याय चक्रुः सर्वत्र भारते ।
अङ्गला दमनं चक्रुः सशस्त्रैः सैनिकैर्बलात् ॥१८॥
नेहरुं च पटैलं च पन्तं बोसं तथाऽपगान् ।
राजेन्द्रं चापि राजानं सर्वान् कांग्रेसवादिन ॥१९॥
नेतॄन् ते वन्दिनश्चक्रुर्मारयाञ्चक्रिरे जनान् ।
हिन्दवो दत्तसर्वस्वा नामुञ्चन् सत्यमाग्रहम् ॥२०॥
विफला राज्यकर्तॄणां दण्डनीतिरभूत्तदा ।
नीतिः सद्यः फला तेषां भेदमुत्पाद्यशासनम् ॥२१॥
हिन्दूयवनयोर्भेदात्तेऽन्वशासन् भारतम् ।
निपुणा राजनीतौ ते यवनानां प्रवेशनम् ॥२२॥
कांग्रेसे कांक्षयांचक्रुः आङ्गला विग्रहप्रियाः ।
हिन्दवो यवनाश्चापि समाना भारते प्रजाः ।
यवना समभागा हि स्वराज्ये किं न भागनः ॥२३॥
यूयं संमिलिताः सर्वे राज्यं कुरुत भारते ।
योग्यान् राष्ट्रधुरं वोढुं वाञ्छामो युष्माकान् वयम् ॥२४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वयं स्वदेशान्निच्छमो गन्तुं ते प्राप्नुवन् तदा ।
कांग्रेसे च ततः स्थानं यवना लेभिरे समम् ॥२५॥

आङ्ग्लैः भारतं राज्यं दत्तं कांग्रेसहस्तयोः ।
हिन्दूमुस्लिमयोधर्मजातिभेदोऽपि चर्चितः ॥२६॥

पाकिस्तानप्रसङ्गः

यवनानां मुख्यो जिन्ना पाकिस्तानं पृथग्विधम् ।
राष्ट्रं यवनजातीयमीहे आङ्ग्लनोदितः ॥२७॥
दान्ता हिन्दुनेतारः सर्वलोकहितैषिणः ।
विभागं स्वस्य देशस्य भारतस्य न सेहिरे ॥२८॥
यवनाः सिन्धुपाञ्चालदेशयोश्चक्रिरे कलिम् ।
हठान्निष्कासयासुर्मारयाञ्चक्रिरे प्रजाः ॥२९॥
आङ्ग्लाः कारयामासुः पाकिस्तानं बलात्तदा ।
विभज्य यवना पाकं पूर्वपश्चिमभागयोः ॥३०॥
स्वजातीयप्रजातन्त्रं राष्ट्रं कर्त्तुं समीहिरे ।
पाकाः पुनः प्रजातन्त्रमन्वशासितुमक्षमाः ॥३१॥
सैन्यशासनयोगेन तेऽन्वशापन्नबुद्धयः ।
प्रजाशोषणकर्माणः कराधानैकतत्पराः ।
दण्डशासनमाचेरुः पाका नीति पराङ्मुखाः ॥३२॥

बंगालदेशोदयः

सेनाशासनात् दूनाः पाकदेशनिवासिनः ।
ईहन्तेस्म गणराज्यं दुःशासनविमुक्तये ॥३३॥

जना मुजीबुरहमानं बङ्गबन्धुरिति श्रुतम् ।
चक्रिरे स्वीयनेतारं प्रदाय स्वं बहुमतम् ॥३४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाकाधिकारिणश्चण्डा विरोधं तस्य चक्रिरे ।
सोऽपि लोकमतो बङ्ग मुजीवो मुक्तिवाहिनीम् ॥३५॥

स्वसेनां योजयामास रक्षणाय जनुर्भुवः ।
पूर्वपाकं निराकृत्य बङ्गदेशं प्रकल्पयन् ॥३६॥

पाकबंगालयोर्युद्धम्

सा बङ्गस्य सत्तायै युयुधे मुक्तिवाहिनी ।
पाको ववर्ष बम्बानि बंगदेशस्य हानये ॥३७॥

शतशो नाशिता ग्रामा ध्वस्तानि नगराणि च ।
बाला वृद्धाः स्त्रियश्चापि हता लोकाः सहस्रशः ॥३८॥

जनाः विहाय बंगालं भारतं शरणं गताः ।
पाकाः पराजिता पूर्वं भारतेन पुनः पुनः ॥३९॥

बंगलादेशरक्षणम्

स्वभाववैरिणः शत्रुमित्रशक्तिप्रणोदितः ।
आमेरिकं बलं लब्ध्वा लब्ध्वा चीनबलं च ते ॥४०॥

भीमं विध्वंसमाचेरुः पुनराक्रम्य भारतम् ।
जागरुकैः स्वरक्षायां भारतीयैर्भटैः रणे ।४१॥

बद्धाः पाकभटा मुख्या मारितास्ते सहस्रशः ॥

बभूव तुमुलं युद्धं भारत-पाकसेनयोः ।
ररक्ष भारतो दान्तः बङ्गं मित्रं रणाङ्गणे ॥४२॥

भारतपाकयोर्युद्धम्

बंगरक्षणसंक्रुद्धाः परप्रत्ययबुद्धयः ।
पाका भारतमाक्रम्य द्वन्द्वं चक्रुः पुनः पुनः ।४३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतोऽपि स्वरक्षायां जागरूकः स्ववैरिभिः ।
युयोध युद्धधर्मेण राजनीतिवशीकृतः ॥४४॥

बभूव निर्भरं युद्धं पाकभारतयोस्तदा ।
सीमसु भारतीयेषु रामरावणयोरिव ॥४५॥

पत्तिः पदातिं प्रजहार भूमौ
आकाशयानं युधि चाम्बरस्थः ।
पोतस्थितं पोतगतोऽपि योद्धा
तुल्यप्रतिद्वन्दि बभूव युद्धम् ।४६।

टैंकस्थिताभ्योऽतिभयङ्कराभ्यः
स्वयंचलाभ्योऽग्रभुशुण्डिकाभ्यः ।
गोलाप्रवर्षो हुतभुङ्मुखाग्रः
प्रज्वालयामास सपत्नसैन्यम् ॥४७॥

आकाशमार्गान्मुमुचुः प्रक्रुद्धाः
बम्बानणूंस्तान् यवना युवानः ।
भटाः सुदक्षाः पततो बभञ्जुः
गर्जद्भिरस्त्रैर्युधि भारतीयाः ॥४८॥

जीपव्रजानां रणभूचराणां
टैंकव्रजानां गुरुभारभाजाम् ।
गतागतैर्वर्मभृतां च यूनां
उच्चावचा भूः समतां प्रयाति ॥४९॥

केचिद् भटा लौहभुशुण्डिकाभिः
अन्ये नदत्तोपविमुक्तगोलैः ।
परे च कार्तूसधरैः शुषीभिः
नवा युवानः प्रतियान्ति पाकान् ॥५०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिरांसि कायान्निपतन्ति यूनां
भुजा भटानां निपतन्ति भिन्नाः।
नृत्यन्ति रुण्डानि रणाङ्गणेषु
पाकाः सुपापा अपि यान्ति नाकम् ॥५१॥

अहो किमेतत् प्रतियाति कोऽयं
शस्त्राणि मुक्त्वा रिपुसैन्यमध्यात्।
शीर्षण्यहस्तो नतकन्धरोऽसौ
सेनानिमुख्यं पदगोप्यरोडम् ॥५२॥

हंहो नियाजिः शरणं प्रयाति
हर्षध्वनिं भारतसैनिकानाम्।
शृण्वन्नरोडः पुरतः प्रसन्नः
नम्रो नियाजेः कुशलं प्रशास्ति ॥५३॥

धन्योऽसि जानासि हितं जनानां
आयासि काले शरणं यतस्त्वम्।
प्रीतः पुनः सोऽभिदधे नियाजिं
भवन्ति धीरा विपदासु वीराः ॥५४॥

पाक नामात्मसमर्पणम्

हताः सुयोधाः त्रिदिवं प्रणीताः
सेनाः प्रणष्टा न दधाति धैर्यम्।
कारासु बद्धा पृतनाधिपा नः
वशीकृताः स्मो युधि भारतीयैः ॥५५॥

न सन्ति भोज्यानि बुभुक्षितानां
न सन्ति शस्त्राणि युद्धि प्रयोक्तुम्।
सन्नद्धयान्यानि न सन्ति चालं
जानीहि भो आत्मसमर्पणं नः ॥५६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युद्धावसानम्

एवम् वचनमाकर्ण्य नियाजेः सेनापतिः।
अरोडः युद्धपर्यन्तं स्वमादेशमघोषयत् ॥५७॥

पाकस्यात्मसमर्पणक्षणम्

संयुक्तराष्ट्रस्य सुरक्षापरिषदि दीनहीनमलीनभावेन युद्धशान्ति भिक्षमाणस्य पाकप्रधानस्य जल्फिकाराली भुट्टोमहाशयस्य विकृते मस्तिष्के विचाराणाविस्फोटोऽभवत्। स च—

अद्यैव पाकः प्रलयं प्रयातु हतः स पूर्वोऽपि च पश्चिमोऽपि।
अहं स्वमित्रैः सह भारतेन युद्धं करिष्यामि समाः सहस्रम् ॥

इति प्रतिज्ञामकरोत्।

यावदस्याः भुट्टोः प्रतिज्ञायाः दिनमेकमपि न व्यतीतम् तावद् दिसम्बरमासस्य १६ तमे दिनाङ्के एव प्राणरक्षां भिक्षमाणायाः पाकपृतनायाः सेनापतिः नियाजीमहाशयः भारतीय सेनापतेः अरोडामहानुभावस्य पुरतः आत्मसमर्पणं कृतवान्।

कानिचिद् दिनानि पूर्वं यदा पाकिस्तानस्य राजपालः डा. मलिकः सेनानिव्याजं नियाजिमात्मसमर्पणाय प्रोक्तवान्, तदानीं सः— 'यावदहं जीवामि, एकोऽपि मम सैनिकश्च जीवति, तावदहं भारतेन योत्स्यामि'। इतीमां गर्वोक्तिं कृतवान्। नियाजेः परिचिताः सर्वेऽपीमं सेनापतेः दम्भमनिन्दन्।

ढाकाविजयाय अभियानात् पूर्वमेव स्थलसेनाध्यक्षः श्रीमानेकशा अपि पाकिस्तान-पराजयस्य पूर्वरूपमभिज्ञाय पाकिस्तानीय-सेना मुख्यान् आत्मसमर्पणाय प्रेरितवान्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन्नेवान्तरे भारतीयभटप्रहारैर्भीतः राजपालः डा. मालिकोऽपि स्वाधिकारात् त्यागपत्रं दत्वा स्वरक्षितं प्रदेशमगच्छत् ।

पाकानामात्मसमर्पणमिदं भारतीयवीराणां वीरगाथासु गौरवस्यक्षणम् ।

शुभावसरोऽयं साम्राज्यवादिनां सम्प्रदायिप्रचारकाणां च कुचक्राल्लब्धजन्मनः पाकिस्तानस्य विघटनाय ।

शुभक्षणमिदं निरपराधानां सहस्रशो बङ्गालदेशवासिनां पाकसैन्यैः हतानाम्, तत्रानाचारपरिणामनिर्णयस्य ।

प्रशस्तं स्तुतिक्षणमिदं मुक्तिवाहिन्याः गौरवमयस्य संघर्षस्य, तत्र लब्धस्य साफल्यस्य च ।

स्तोत्रावसरमिदं शौर्यवीर्यधैर्यौदर्यवतां भारतीयसैनिकानां विजयस्य यशोगानस्य। स्तुतिसमुचितं क्षणमिदं मानवीयाधिकाराणां रक्षकस्य भव्यस्य भारतस्य तदीयोदयस्य च ।

जयन्तु भारता वीरा जयता मुक्तिवाहिनी ।
विजीयात् भारतो देशः बङ्गालश्च सुखी भवेत् ॥

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद्धर्मस्ततः सुखम् ॥

Castle Mills

THANA

—:MAHARASTRA:—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

113506

शोभते

इन्दिरेवाऽसौ

भारतरत्नमिन्दिरा

अन्तः सारैरकुटिलैरच्छिद्रैः सुपरीक्षितैः ।
मन्त्रिभिधीयते राष्ट्रं सुस्तम्भैरिव मन्दिरम् ॥१॥

मन्त्रतन्त्रार्पितप्रीतिः देशकालोचितस्थितिः ।
देशस्य यो भवेद्भक्तः सोऽमात्यः संप्रशस्यते ॥२॥

संग्रहं नाकुलीनस्य सर्पस्येव करोति यः ।
स एव श्लाघते मन्त्री सम्यग्गारुडिको यथा ॥३॥

इन्दिरेवेन्दिराऽस्माकं मन्त्री भारतवासिनाम् ।
शोभते पाकलोकानां विजयेन सुखमेधते ॥४॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शतघ्नीमुखेभ्यो वमत्यग्निपुञ्जम्

[१]

धनानि लुण्टन्ति हरन्ति धान्यं
क्षेत्रेषु सस्यानि समुद्धरन्ति ।
हिंसन्ति बालानपि योषितश्च
युद्धेषु बङ्गानभियान्ति पाकाः ॥१॥

[२]

गाः घ्नन्ति भञ्जन्ति च मन्दिराणि
पक्कानि चान्नानि विनाशयन्ति ।
निघ्नन्ति पाका यवनानपि स्वान्
विनाशकाले विपरीतबोधाः ॥

[३]

भोज्यानि वस्त्राणि गृहाणि पाकाः
बङ्गस्थितानां निजबान्धवानाम् ।
अण्वस्त्रघातैः परितो विनाश्य
निःसारयन्ति तरसा स्वदेशात् ॥

[४]

जनान् पूर्वबङ्गे स्थितान् पाकसैन्याः
निशातैः कशानां प्रहारैः प्रक्रुद्धाः ।
गुणैर्बद्धहस्तान् विवस्त्रान् विधाय
तुदन्ते वाराकान् विनैवापराधम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(५)

या मुक्तिसेना परिरक्षणार्थं
बङ्गप्रधानैः परिकल्पिताऽस्ति ।
न साऽल्पशस्त्रा प्रतिभाति त्रातुं
बङ्गो हि मृत्योः शरणं प्रयाति ॥

(६)

बद्धो मुजीवः सचिवो जनानां
नीतः क्व दूरं न विदन्ति लोकाः ।
अनायकं युद्ध्यति मुक्तिसैन्यं
युद्धोद्यतान् शातयते च शत्रून् ॥

(७)

अण्वस्त्रपातैर्गुलिकानिपातै-
राग्नेयशस्त्रैश्च हताहतास्ते ।
जरठा अबोधा बालाः स्त्रियश्च
पलाय्य बङ्गाः प्रविशन्ति पार्श्वम् ॥

(८)

दयां न बङ्गेषु करोति कोऽपि
शृणोति बङ्गस्य न कोऽपि रावम् ।
रक्षां न बङ्गाय ददाति कोऽपि
न कोऽपि मित्रं ननु दुर्गतानाम् ॥

(९)

बङ्गं निहन्तुं प्रददाति चीनः
नवानि चास्त्राणि ह्यमेरिकाऽपि ।
पाकस्य मित्राणि शपन्ति बङ्गान्
सुदुर्बले को न ददाति लत्ताम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१०)

न राष्ट्रसंघः प्रकरोति पक्षं
न यावनः पृच्छति कोऽपि वार्ताम् ।
देवोऽपि बङ्गाय न राति शक्तिं
सुदुर्गतो भारतमेति बङ्गः ॥

(११)

ददाति रक्षां शरणागतेभ्यः
स भारतोऽन्नं वसनं गृहाणि ।
पाकात् परित्राणमतिव्ययं च
सतां विभूतिं जनसेवनाय ॥

(१२)

प्रच्छन्न शत्रू ननु भारतस्य
खलौ तु चीनश्च ह्यमेरिकाऽपि ।
शस्त्राणि ताभ्यामभियाति लब्ध्वा
पाकः खलो नश्यति दुष्टसङ्गात् ॥

(१३)

गृहीत्वा बलं चीनदेशाद्धि पाकः
स युद्धाय पोतान् परानामरीकान् ।
तृणं मन्यते भारतं चापि बङ्गं
शतघ्नीमुखेभ्यो वमन्नग्निपुञ्जम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथापि भुट्टो भव सावधानः

[१]

युद्धं समाप्तं प्रथते सुजीवः
गृहे गृहे वङ्गजनेषु हर्षः ।
अस्त्राणि शस्त्राणि विहाय पाकः
अहोऽति भीतः शरणं प्रयाति ॥

[२]

भुट्टोऽधुना मुञ्च रणस्य वार्तां
वैरं च हिन्दूजनजातिदेशात् ।
शृङ्गैः परेषां परियोधते यः
शण्डः सुपीनोऽपि जयं न विन्दते ॥

[३]

चीनाः सुदूरं निवसन्ति पाकात्
ह्यामेरिकास्ते मित्राणि दूरात् ।
अरबादयस्ते जात्या न सङ्गं
दास्यन्ति चापत्सु समागतासु ॥

[४]

युद्धस्य शक्तिस्तव नास्ति भुट्टोः
न योग्यता तेऽस्ति जनप्रशास्तौ ।
इतो निराशो भव पाकतन्त्रात्
तवादृशानां वैराग्यमाश्रयः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[५]

भोगी परेषामपि दुष्कृतानां
क्लिश्नाति नित्यं कदैनरीणाम् ।
आप्नोति चिन्तां जनजूर्तिज्ञातां
तन्त्राधिकारी न सुखेन शेते ॥

[६]

शुद्धोः किमर्थं प्रकरोषि राव-
मह्यां त्वमापृच्छ विहाय रोषम् ।
किं ते हृतं क्वापि च भारतेन
येन त्वमाक्रम्य करोषि युद्धम् ॥

[७]

अकालमरणं घटते भटानां
व्यापारहानिः खलु नैगमानाम् ।
धनस्य धान्यस्य बलस्य नाशः
न कोऽपि लभते युधि मोदकानि ॥

[८]

युद्धानुरागो हरते वसूनि
युद्धस्य तापो जनतापहेतुः ।
जयोऽपि युद्धे न करोति भद्रं
पराजयस्तत्र परो विनाशः ॥

[९]

नाहंकृतिं मुञ्चति योऽवमानैः
न लज्जते शत्रुपराजितोऽपि ।
अह्ना न ते दास्यति क्वापि योगं
मुञ्चस्व शुद्धोः पतितस्य सङ्गम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[१०]

न केवलं यो वङ्गे स्थितानां
हिन्दूजनानां कृशनाऽनुगानाम् ।
हन्ता निजानामपि बान्धवानां
स यावनानां विषयस्य शत्रुः ॥

[११]

अद्याप्रसङ्गेन तवापि भुट्टो
नाशः समभ्येष्यति शीघ्रमेव ।
हठात् विमूढाः परपापभाजः
गाधेऽपि नावं विनिमज्जयन्ति ॥

[१२]

अद्या हताशोऽसफलः प्रयातः
पाकप्रणाशं प्रणिधाय दूरम् ।
त्वमस्य पाकस्य हतस्य तन्त्रं
गृह्णासि भुट्टो ननु मन्दबुद्धिः ॥

[१३]

मुञ्च त्वमश्रूणि रणे हतानां
स्वेषां परेषां च समाधिभूमौ ।
क्षमां परेशादपि याचय त्वं
पापस्य पश्चात्तपनं हि मार्जनम् ॥

[१४]

नो चेत् भटा भारतभूमिभक्ताः
पाकं प्रक्रुद्धास्तव सैन्यजातम् ।
नेष्यन्ति वीराः सदनं यमस्य
जानीहि भुट्टो वचनं कृतं नः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[१५]

विहाय वैरं कुरु भारतीयैः
मैत्रीं जनैः सह पूजां च तेषाम् ।
नश्यन्ति वैरेण महद्भिरज्ञा
अथाऽपि शुद्धो भव सावधानः ॥

पाकानां पलायनम्

[१]

ढाकाऽभियाने हतपाकसैन्याः
सोढुं कदर्या युधि भारतानाम् ।
गोलाप्रहारं चपलाप्रचण्डम्
गेहं पलायन्ति गृहीतजीवाः ॥

[२]

गेहेऽपि गोलापतनं निरीक्ष्य
मित्राणि बन्धून् तनयांश्च दारान् ।
धनानि वस्त्राणि गृहाणि चापि
पाकाः पलायन्ति विहाय सर्वम् ॥

[३]

रणाजिरे भारतवीरमुक्तैः
मार्टारगोलैः गुरुटैंकरूढाः ।
पाका विनश्यन्ति विहाय देहं
प्राणान् समादाय दिवं प्रयान्ति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्रतिनोयुवानः

(१)

विचेतुमिच्छन्ति सदैव पुण्यान्
गुणानपुण्यान् परिवर्जयन्ति ।
अन्वेतुमिच्छन्ति सतां चरित्रं
विद्यार्थिवृत्ता व्रतिनो युवानः ॥

(२)

अध्येतुमिच्छन्ति सदा सुविद्या
गुरून् भजन्तो विनयेन नित्यम् ।
पुष्णन्ति वृद्धेषु चिराय श्रद्धां
विद्यार्थिवृत्ता व्रतिनो युवानः ॥

(३)

परस्परेष्वादरमादधानाः
सन्मित्रवर्गेषु च विश्वसन्तः ।
भूतेषु मैत्रीं च समादधन्तो
विद्यार्थिवृत्ता व्रतिनो युवानः ॥

(४)

परोपकाराय कृतप्रयत्ना
जनोपतापं च निवारयन्तः ।
कार्याणि पुण्यानि मुहुश्चरन्तो
विद्यार्थिवृत्ता व्रतिनो युवानः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(५)

प्रीणन्ति लोकान् चरितैः स्वकीयै
रावर्जयन्तश्च रिपूनपि स्वान् ।
विज्ञानबोधेन परिक्रमन्तो
विद्यार्थिवृत्ता व्रतिनो युवानः ॥

(६)

स्वाध्यायवेलासु च जागरूकाः
काले प्रबुद्धा अधियन्ति शास्त्रम् ।
विद्वच्चरित्राणि समाचरन्तो
विद्यार्थिवृत्ता व्रतिनो युवानः ॥

(७)

मातुर्मुदं जन्मभुवश्च गर्वं
पितुर्यशो दिक्षु पुरो नयन्तः ।
विद्यागुरूणां च कृपां स्तुवन्तो
विद्यार्थिवृत्ता व्रतिनो युवानः ॥

(८)

ते ब्रह्मचर्यं नियमैर्यमैश्च
सदा चरन्तः सुचिरं प्रसन्नाः ।
स्वसंस्कृतं संस्कृतमेव वाचं
समाश्रयन्ते व्रतिनोः युवानः ॥

(९)

चित्राऽयनं ते न प्रयान्ति नित्यं
यत्रापि कुत्रापि न यान्ति यैः कैः ।
त्वंकारयुक्तां न वदन्ति वाचं
विद्यार्थिवृत्ता व्रतिनो युवानः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१०)

वेषं स्वकीयं न परित्यजन्ति
भाषां स्वकीयां न परित्यजन्ति ।
रीतिं प्रतीतिं च समाचरन्तो
विद्यार्थिवृत्ता व्रतिनो युवानः ॥

(११)

देवालयं यान्ति नमन्ति देवान्
प्रार्चन्ति धेनूः नरदेवलोकम् ।
मानं प्रभूतं ददते वरेभ्यो
विद्यार्थिवृत्ता व्रतिनो युवानः ॥

(१५)

कामान् यमित्वा दमयन्ति लोभं
क्रोधं च कर्षन्ति मनो नियम्य ।
मुञ्चन्ति भीतिं समये च शङ्कां
विद्यार्थिवृत्ता व्रतिनो युवानः ॥

WTIH BEST COMPLIMENTS FROM

TULSIDAS KHIMJI. P.v.t Ltd.

(BANK'S MUCCADAMS)

CLEARING SHIPPING, FORWADING, WAREHOUSING,
INSURANCE AND AIR CAREGO AGENTS.

46, Veer Nariman Road, BOMBAY—1.

(TEL. NO. 259484) TELEGRAM: NACHIKETA

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रेष्ठिवर्याणां श्रीमतां श्रीगोपीकृष्णजी महानुभावानां

ज्येष्ठपुत्रस्य आयुष्मतः श्रीअशोककुमारस्य शुभे विवाहोत्सवे पठितानि आशीर्वादपद्यानि

[१]

यस्मिन् प्रसादसुमुखे विमुखीभवन्ति
विघ्नानि यानि जगति प्रभवन्त्यसन्ति ।
सोऽयं प्रसीदतु करोतु शतं शिवानां
गौरीसुतो गणपतिर्गणराजदेवः ॥

[२]

उर्व्या युतः स्वजनमित्रगणेष्वशोकः
वा भात्ययं सुरगणेषु यथा महेन्द्रः ।
लक्ष्म्या यथा परिवृत्तः परिभात्युपेन्द्रः
रात्रौ कलाभिरिव शोभति पूर्णचन्द्रः ॥

[३]

गोपीकृष्णसुतो नतो मधुरवाक् सुश्रीरशोको वरः
शिक्षायां प्रवरा तथापि सरला सौभाग्यशीला वधूः ।
उर्वीयं वरसंगता द्युतिमती लक्ष्मीरिवाशोभते
एतौ स्निग्धवधूवरौ सुहचिरौ स्यातां चिरंजीविनौ ॥

[४]

अशोकोऽयं शुभ्रैः शुभगुणगणैरावृततनुः
इमोर्वी शोभा वै समधिकगुणा श्लाघितवधूः ।
द्वयोरेषः स्नेहोऽखिलगृहजनानन्दजनकः
फलैं फूलैं दोनों यशधनकमावें मुदित हों ॥

शुभाभिलाषी—
वैद्यनाथशर्मा आयुर्वेदाचार्यः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

excitingly—
exclusively—
exquisitely—

Khatau
voiles

Ask for 'Cum-Cum' and
a matching 'Kashmira' Blouse.

THE KHATAU MAKANJI SPG. & WVG. CO. LTD., Head Office: Laxmi Building, Ballard Estate, Bombay-1. Mills: Haines Road, Byculla Bombay-27. Wholesale Clothshop: Govind Chowk, Mulji Jetha Market, Bombay 2. Retail Stores: Hashim Building ...

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Regd.No. MH 321 Balsanskritam FEBRUARY 1972

अस्माकं प्रकाशनानि

		रु. पैसे
संस्कृतव्याहारः	भागाः १-५	०.७५
सप्त विभक्तयः		०.७५
पञ्च सन्धयः		०.७५
संस्कृतप्रवेशिका	भागाः १-३	
बालनीतिकथाः	भागाः १-८	
संस्कृतसोपानम्	भागाः १-३	
प्रहेलिकाशतकम्		
संभाषा	भागाः १-५	
संभाषा English	" "	०.६२
लौकिकन्यायरत्नमञ्जूषा		१.२५
संस्कृतप्रबन्धचन्द्रिका	भागाः १-३	१.२५
सुन्दरं संस्कृतम्	" "	०.७५
कुमारसंभवम्	[संक्षिप्तगद्यम्]	०.७५
रघुवंशम्	"	०.७५
भारतीयमहापुरुषाः		१.२५
संस्कृतवर्णमाला		१.००
चाणक्यनीतिः		१.२५
चाणक्यसूत्राणि		०.७५
बालरामायणम्		०.७५
साधुसुभाषितानि		०.७५
लघुनिबन्धावली		१.००
समासाः		
कृदन्ताः		
शालेयसुभाषितानि		
कादम्बरी-कथा	[संक्षिप्तगद्यम्]	

✦ बालसंस्कृतकार्यालयः ✦

लालबहादुरशास्त्री मार्ग, घाटकोपर, बम्बई ८६

वैद्य-रामस्वरूपशास्त्रिणा, भारतीयमुद्रणालये घाटकोपरे मुम्बापुर्यां प्रकाशितम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्षः २३

बालसंस्कृतम्

अङ्कः ३

सम्पादकः— वैद्य रामस्वरूपशास्त्री आयुर्वेदाचार्यः

वार्षिकं शुल्कं सप्त रूप्यकम्

बालसंस्कृतकार्यालयः लालबहादुरशास्त्री मार्ग, घाटकोपर, ८६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुलसी-मानस प्रकाशन

जीवनोपयोगी साहित्य

१	पीस आफ माइण्ड	रु. ३	२	ज्ञानसाधना	रु. २
३	संसार का सार	३	४	वेदान्त का सरल बोध	१
५	विज्ञान से ज्ञान	१	६	वेदान्त नवनीत	१.५०
७	मुमुक्षु	५	८	आध्यात्मिक पिक्टोरियल	२
९	मन की शान्ति	४	१०	मनन (मासिक) वार्षिक	४

प्राप्तिस्थानम् गुप्ता मिल्स् स्टेट, रे रोड, बम्बई-१०

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद्धर्मस्ततः सुखम् ॥

Castle Mills

THANA

—:MAHARASTRA:—

प्रातः सायं स्वाध्यायः

वैद्य-रामस्वरूपशास्त्रिणः संचालकत्वे बालसंस्कृतस्य कार्यालये, आगरा मार्गे मुम्बापुर्यां घाटकोपरे सायं प्रातश्च ७ वादनतः आरभ्य ८॥ वादनपर्यन्तं कक्षाश्चलन्ति । छात्रैः प्रवेशः प्राप्तव्यः ।

वैद्यः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयं निवेदनम्

जगतीह— 'सुखी भवेयम्' इति वाञ्छति सर्वोऽपिजनः। सुखं च ज्ञान-योग्यतया भवति। ज्ञानं तादृशं चक्षुः येन सर्वं भवति प्रत्यक्षम्। ज्ञानं हि जीवनं जन्मवताम्। ज्ञानं हि जायते जन्मना सह आयुषा च प्रवर्धते। ज्ञानवान् हि जीवने प्रवर्तते। 'ज्ञानवान् मां प्रपद्यते' इति च भगवदुक्तेः।

ज्ञानं तृतीयं पुरुषस्य नेत्रं समस्ततत्त्वार्थविलोकदक्षम्।
तेनोऽनपेक्ष्यं विगतान्तरायं प्रवृत्तिमत्सर्वजगत्त्रयेऽपि॥

विश्वमुत्पाद्य विश्वस्य कर्त्ता सर्वस्य ज्ञानार्थं वेदांश्चकार। स ज्ञानद्वारेणैव जंगममकरोन्निखिलं जगत्। ज्ञानं हि प्रथमाकाङ्क्षितं सर्वजगताम्।

ज्ञानं ज्ञानेन वा प्रवृत्तिः सर्वजगताम्। बालः स्वयमेव ज्ञातुं प्रयतते, पुनश्च सर्वेऽपि पालकाः पितरश्च ज्ञानार्जनाय बालकान् पाठशालां गमयन्ति। बालकस्य ज्ञानं मातुरङ्कादेव प्रारभते। शिशुः मातुर्मुखात् स्वभाषा वक्तुं शिक्षते, ततश्च परिप्रश्नेन उपदेशेन वा वर्धते तस्य ज्ञानम्। ज्ञानेन वर्धते तस्य ज्ञानं बलं च। स विज्ञातुमुपरिक्रमते। शालायां स गणितं भूगोलमितिहासं च ज्ञात्वा पदार्थविज्ञानं पठितुमारभते। अध्ययने तस्य भाषा विज्ञानंमाध्यमतां भजते, अत एव भाषा शिक्षणेऽपि स रुचिं विधत्ते। मातृभाषा मुखेन स संस्कृतं शिक्षते। भाषाणां जननं जीवनं च संस्कृतम्, शास्त्राध्ययने छात्रस्य रुचिं समर्थयते। शास्त्राण्यधीत्य स विद्वान् संजायते स वाञ्छितानि लभते, सुखीभवति, स विनयी संजायते। स योग्यः संजायते। इति संस्कृतं छात्रैरवश्यमध्येतव्यम्। संस्कृते विद्याः सन्ति।

विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मस्ततः सुखम्॥

नेत्राञ्जनानि लोकाना श्रुतयश्च शास्त्राणि च।
सुखाय संस्कृते सन्ति तदध्येयं सुधीवरैः॥

इति संदिशति वैद्यः— रामस्वरूपशास्त्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालसंस्कृतस्य स्वत्वसम्बन्धे ऽधिकृतं विवरणम्

चतुर्थे पृष्ठेऽष्टमो नियमः

पत्रस्य नामधेयम्	बालसंस्कृतम्
प्रकाशनस्थानम्	मुम्बापुरी-८६
प्रकाशने समयमर्यादा	मासिकं पत्रम्
मुद्रकस्य नामधेयम्	भारतेन्दुः उपाध्यायः
नागरिकता	भारतीयः
संकेतः	भारती मुद्रणालयः घाटकोपर, बम्बई
प्रकाशिकायाः नाम	सुशीलादेवी, श्रीनाथद्वारम्
नागरिकता	भारतीया
संकेतः	गुर्जरपुरी, नाथद्वारम्, राजस्थानम्
सम्पादकस्य नाम	वैद्यः रामस्वरूपशास्त्री
नागरिकता	भारतीयः
संकेतः	घाटकोपर, बम्बई-८६
संस्थापकः	वैद्य- रामस्वरूपशास्त्री, आग्रा रोड, घाटकोपर, बम्बई-८६
पत्रस्य सम्पत्तेरधिकारी	वैद्य- रामस्वरूपशास्त्री

अहं वैद्य॰ रामस्वरूपशास्त्री विज्ञापयामि यदुपरिदत्तं विवरणं मदीय॰ विश्वासे परिज्ञाने च सत्यम् ।

आप का सुपरिचित —
देशी औषधियों का महान् उत्पादक—
श्रीवैद्यनाथ आयुर्वेद भवन प्रा. लि.
कलकत्ता, पटना, झांसी, नागपुर, वाराणसी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

दिल्ली-शिक्षा-निदेशालयेन राजस्थान-शिक्षा-विभागेन च मान्यता-प्राप्तम्

सरस्वती श्रुतिमहती महीयताम्

बालसंस्कृतम्

पुरे ग्रामे गृहे कुट्यां बाले वृद्धे युवस्वपि ।
संस्कृतस्य प्रचाराय प्रभूयाद् बालसंस्कृतम् ॥

वर्षम् २३] सम्वत् २०२९ वि. चैत्रः, मार्च १९७२ खि. [अङ्कः ३

वेदेषु गोप्रशंसा

हिं कृण्वती वसुमती वसूनां
वत्समिच्छन्ती मनसा न्यागन् ।
दुहामश्विभ्यां पयो अघ्न्येयं
सा वर्धतां महते सौभगाय ॥

(अथर्व० ७।७७।९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतं लोकभाषासीत्

—०—

देववाणी पदमलं कुर्वती भूदेवरक्षिता संस्कृत भषा अद्यापि तिष्ठति विश्वस्य भाषाणां प्राणभूतम् । सा हि जननी- जीवनी च विश्वजनीनस्य भाषितस्य । न कापि भाषा वर्तते जगतीतले या विना संस्कृतं जीवेत् । सर्वा अपि ताः संस्कृतादेव समुपलब्धसाहित्य-वैभवाः सन्ति । संस्कृतभाषा खलु वैज्ञानिकी भाषा, यस्यां वर्णा मात्राश्चापि विज्ञानमयाः सन्ति । लोके लब्धप्रतिष्ठायाः कस्या अपि भाषायाः संस्कृतशब्दा यदि निः सारिताः स्युः, तर्हि तस्या प्राणा एव निःसारिताः भवेयुः इति को न जानाति धीरः ।

वर्तते आङ्गलीभाषा सर्वेषु द्वीपेष्विदानीं लब्धप्रतिष्ठा । तस्यां पञ्चाशत् प्रतिशतं संस्कृतशब्दाः सन्ति । ते यदि निःशेषं निःसारिता भवेयुः तदा सा अपि मृता भवेत् । उदाहरणार्थम्– त्रिः Three, षट् Six, सप्त Seven, अष्ट Eight, नव Nine, एभ्यो गणनाङ्केभ्यः एते संस्कृतशब्दाः निःसरिताः स्युः, तर्हि तत्र न किमप्यत्रशिष्यति व्यवहारयोग्यम् । तस्या व्यवहार एवावरूद्धो जायते । न सा जीवितु प्रभवेत् । पुनश्च मातृ Mother, पितृ Father, स्वसृ Sister भ्रातृ Brother इनः Sun मृगाङ्कः Moon तारः Star प्रभृतयः शते पञ्चाशत् संस्कृतापभ्रंशा यदि नतो निःसारिता भवेयुः । न सा चलेत् । भारतीयाः भाषास्तु शतं प्रतिशतं संस्कृतशब्दशालिन्यः सन्ति । न ताः विना संस्कृतं शक्नुवन्ति जीवितुम् । ये तु मूढाः भाषाणां प्राणभूतं संस्कृतं मृतं शंसन्ति, ते तु स्वयं मृताः सन्ति । जीवितास्तु त एव सन्ति—

ये स्वात्मजं स्वशिष्यं निजबन्धुवर्गं
ग्रामं निज स्वनगरं प्रान्तं स्वदेशम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वां संस्कृतिं विदधते नवसंस्कृतेन
जीवन्ति ते सुकृतिनो ह्यतरे श्वसन्ति ॥

पुनरपि– 'संस्कृतस्याध्ययनमध्यापनं च पुस्तकस्थमेवाऽऽसीत् पुरातनानाम्, न तु व्यावहारिकम्, इति विवदन्ति प्रमाणपराङ्मुखाः केचित् । भूतार्थं जानन्तस्तु, संस्कृतशाखानामायुर्वेदज्योतिषमन्त्रतन्त्रादीनां प्रत्यक्षसाक्षित्वेन स्वकीयेन तर्केण च भूयः 'भाषाणां जननं जीवनं चेति' परिपुष्णन्ति संस्कृतम्—

प्राचीनं वैदिकं संस्कृतमपि तदानीं जनभाषितम् आसीत् । वैदिकसंस्कृतात् इतरभाषितस्य तदाऽप्रसिद्धेः । तदानीन्तनानां रावणादिकृतानां वेदभाष्याणाम्, तदनु ब्राह्मणग्रन्थानाम् ततश्च उपनिषदां प्रादुर्भवनं च संस्कृते एवोपलभ्यते लिखितम् ।

आदिकविर्महर्षिः वाल्मीकिरपि जनप्रचलितायामेव भाषायां तदानीं रामायणमकरोत्, इति तत्रत्यानां पात्राणां कथनोपकथनमेव प्रमाणम् । संस्कृतभाषां मानुषीं गिरं निरदिशत् आदिकविः— 'वाच चोदाहरिष्यामि मानुषीमिह संस्कृताम्' इति सुन्दरकाण्डेऽशोकवाटिकायां जगन्मातुः सीतायाः दर्शने हनुमतो वचनात् । भगवान् व्यासोऽपि तदानीं देवानां मानुषाणां च 'संस्कृतम्' इत्येकैव भाषा संवित् आसीत् इति प्रमाणयति ।

लौकिकं संस्कृतं तदानीं सार्वजनीनं भाषितमासीत्, इति प्राचीनानां वैयाकरणानां वचनैरपि प्रमाण्यमुपयाति । यास्कोऽपि 'अन्वध्यायं भाषायाम्' इत्यादिभिः लौकिकवैदिकसंस्कृतयोः भेदं व्याख्याति । पाणिनिश्चापि स्वस्य अष्टाध्याय्याम्, छन्दसि, लोके, भाषायाम्, इत्यादिभिः शब्दैः स्वकीये समये संस्कृतस्य लोकभाषत्वं प्रमाणयति । महर्षिः पतञ्जलिरपि प्रान्तीयान् लौकिकवैदिकशब्दानां प्रयोगान् [illegible] व्याकरणं न केवलं शब्दानेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्युत्पादयति, अपि तु लोकप्रयोगयोग्यौ शब्दापशब्दौ विवेचयन्नपि' इत्याभिदधानः स्वसमये संस्कृतस्य लोकभाषात्वमभिप्रैति ।

इतीत्थं भूतैः प्रमाणैः–' पुरा विन्ध्यहिमालयोर्मध्यवर्तिनि समस्ते भारते देशे सार्वजनीनं भाषितमासीत् संस्कृतं' इति सिद्ध्यति।

तस्य नाटकेषु स्त्रीशूद्रबालकादीनां प्राकृतभाषणोपलब्धेः कवि· कुलगुरोः कालिदासस्यापि समये संस्कृतं कवीनां राज्ञां पुरोहितानां वैद्यानां वाणिजां सैनिकानामपि च व्यवहारभाषितमासीदिति सिद्ध्यति ।

तदानीं गद्यं तु सर्वोऽपि जनः वदति स्म । पद्यबन्धः कवित्वे गणितमासीत्, इति सर्वविधमपि तदानीन्तनं साहित्यं सुधीभिः कविभिः पद्यपुञ्जेषु निबद्धम्। रसरीत्यलङ्कारच्छन्दोबन्धस्तेन प्रमाण· यति तदान्तीन्तने समये संस्कृतस्य प्रचुरं प्रचारं सर्वजनभाषात्वं च।

अधुनाऽपि संस्कृते विविधमुत्कृष्टं च स्वकीयं साहित्यं वर्तते इति न कस्यापि पठितस्य जनस्य तिरोहितम् ।

संस्कृतज्ञानं विश्वस्योपकारकम् आवश्यकं च। इदानीमपि भारते सहस्रशः संस्कृतविद्वांसः सुधियः कवयाश्च सन्ति। ते संस्कृत-मेव पठन्ति लिखन्ति भाषन्ते च। तेषामपत्यान्यपि संस्कृतं भाषि· ष्यन्ते इति प्रतिभाति। इति त्रिष्वपि कालेषु संस्कृतस्य लोकभाषात्वं सिद्ध्यतीति दिक् ।

कवीनां कृतिभिस्तकैः प्रमाणैर्विदुषामपि ।
संस्कृतं लोकभाषाऽऽसीदिति मन्यामहे वयम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालसुभाषितानि

[१]

किं कोकिलस्य विरुतेन गते वसन्ते
किं कातरस्य बहुशास्त्रपरिग्रहेण ।
मित्रेण किं व्यसनकालपराङ्मुखेन
किं जीवितेन पुरुषस्य निरक्षरेण ॥

[२]

नीचं समृद्धमपि सेवति नीच एव
तं दूरतः परिहरन्ति पुनर्महन्तः ।
शाखोटकं मधुरपक्कफलैरुपेतं
सेवन्ति वायसगणा न तु राजहंसा ॥

[३]

हंसो न भांति बलिभोजनवृन्दमध्ये
गोमायुमण्डलगतो न विभाति सिंहः ॥
जात्यो न भाति तुरगः खरयूथमध्ये
विद्वान् न भाति पुरुषेषु निरक्षरेषु ॥

[४]

हंसो विभाति नलिनीदलपुञ्जमध्ये
सिंहो विभाति गिरिगह्वरकन्दरासु ।
जात्यो विभाति तुरगो रणयुद्धमध्ये
विद्वान् विभाति पुरुषेषु विचक्षणेषु ॥

[५]

शास्त्रं सुचिन्तितमथो परिचिन्तनीयं
संसेवितोपि नृपतिः परिसेवनीयः ।
अङ्के धृतःपि युवतिः परिरक्षणीया
शास्त्रे नृपे च युवतौ च कुतो वशित्वम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दन्ताः सन्ति कारणम्

—०—

दन्ताः खलु मुख्या मनुष्याणां मुखस्य शोभासामिग्रीषु । ते रदा रदना दशनाश्च कथ्यन्ते । मानुषस्य मनोहरे मुखे दन्तान् विधाय जितं खलु चतुराननेन चातुर्यस्य पर्यन्तम् । दन्ता हि परमा सुषमा मुखस्य । न कस्य कस्य सुन्दरस्य मुखस्य वर्धते रोचिरनेन लघुना दन्तपदवाच्येन रुचकशकलेन । न खलु वरदानां रदानामेतेषां वरेण्यं प्रभवन्ति कवयोऽपि साकल्येन वर्णयितुम् ।

दन्ताः न केवलं मुखस्य भूषणानि, अपि षड्रसबहुलस्य विविधस्य भोजनस्य चर्वणास्वादहेतवो रुचिकराश्चापि । नाचर्वितस्य भुक्तस्य सम्यक् रसो जायते इति वैद्या वदन्ति ।

न ते केवलं मधुराम्ललवणकटुकषायतिक्तात्मनां भोजनरसानामव चर्वणासाधनानि, अपि तु अनुभवैकवेद्यानां ब्रह्मास्वादसहोदराणां शृङ्गारहास्यकरुणवीरभयानकबीभत्सानां काव्यरसानामपि संवेदनस्थानानि । न क्वापि विना दन्तदर्शनं प्रोक्तानां काव्यरसनामभिव्यक्तिः । न जातु दन्तविहीनात् जठरस्य मुखात् प्रस्तुतः शृङ्गारो जारज इव शोभते सभासु सहृदयानाम् । हास्यादिष्वपि च यावद्दन्तदर्शनं स्वरूपहानिर्जायते रसस्येति रसिका जानन्ति ।

मुखस्य वर्णने यत्र शृङ्गारे रसे कविभिः— नासायाः कामतूणीरत्वम्, केशानां मिलिन्दमालात्वम्, कर्णयोः सौन्दर्याधारपात्रत्वम्, कपोलयोः शीतांशुशकलत्वम्, नेत्रयोः खञ्जनसादृश्यं च वर्णितम्, तत्रैव दन्ता अपि तैः हीरकैः मुक्ताभिः माणिक्यैश्चोपमिताः सन्ति ।

दन्ताः खलु पूर्वभावाः ज्ञानोदयस्य । शिशूनां यावद् दन्तोद्भेदो न जायते, तावदेव तेषां ज्ञानोदयोऽपि न जायते । यथा यथा तेषां दन्ताः संजायन्ते बद्धमूलाश्च भवन्ति । तथा तथैव वर्धते तेषां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानम्, बुद्धिश्च दृढतां याति। वृद्धस्य जनस्य यतो दन्तशैथिल्यं प्रारभते, तत एव तस्य बुद्धिह्रासो ज्ञानशैथिल्यं स्मृतिनाशश्चापि समारभते, इति सर्वोऽपि जरठो जनोऽनुभवति प्रमाणयति च वैद्यकम्।

येषां वन्यानां शशवानरबिडालकुक्कुरशिवाशृगालभल्लूकानाम्, सिंहव्याघ्रवृकवराहाणाम्, गजानां चापि दन्ता दीर्घा दृढाश्च भवन्ति। तेऽपि बलवन्तो बुद्धिमन्तः क्षिप्रकर्माणाश्च भवन्तीति सर्वोऽपि प्रेक्षावान् पश्यति।

दन्तानां निर्माणविधौ जागरूको विधिरपि मानुषाणां पशूनां सिंहानां व्याघ्राणां गजानां सर्पाणां मूषकाणां च स्वस्वप्रयोजनपर्याप्तान् दन्तान् विधाय वर्धयते तेषां महत्त्वमिति मन्यामहे वयम्।

शीतांशो रोचिरादाय वेधा रूपं व्यधात् द्विधा।
प्रथमं दन्तरत्नानि हीरकाणि ततः परम्॥

इत्याहुः कवयः।

अभावे च दन्तानां न जातु सर्वरसम्पन्नस्यापि व्यञ्जनस्य न सम्यक् चर्वितस्याप्यशेषो रसोऽनुभूयते। नहि दन्तविहीनो जरठः क्वापि कवले कवले सुचर्वितस्याहारस्य युवेवान्धः सौन्दर्यस्येव रसं जानाति। दन्तानामभावेऽचर्वितमेव निगलति भोजनं प्रायेण वृद्धो जनः। तेन भुक्तस्याऽपि तस्य सम्यग् रसो न जायते। अप्रयाप्तौ च रसस्य रक्तं न वर्धते। रक्तहानौ चान्येषां मांसमेदसादीनां धातूनां हानिरापद्यते, वर्धते च तस्य दौर्बल्यं प्रतिदिनम्, हीयते च जीवनम्। ततः स पञ्चतां प्रयातीति दन्तहानिः, परा हानिः प्राणवताम्। अत एव दन्तरक्षार्थं नित्यं दन्तधावनमाचरेत्।

तेनास्यरसवैरस्यगन्धजिह्वास्यजा गदाः।
रुचिवैशद्यलघुता न भवन्ति भवन्ति च॥

दन्तानां स्वास्थ्याय दृढतायै च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जातीपत्रपुनर्नवागजकणाकोरण्टकुष्ठं वचा ।
शुण्ठीदीप्यहरीतकीतिलसमं श्लक्ष्णं भृशं चूर्णयेत् ।
तच्चूर्णं वदने धृतं विजयते दौर्गन्ध्यदन्तव्यथां
चाञ्चल्यत्वमतिव्रणश्वयथुरुकण्डूकृमिव्यापदः ॥

इति जातिपत्रादिचूर्णमलम् ।

यादसां च मत्स्यकच्छपगोधिकाकुम्भीरशिशुमारतिमिंगिलानाम्, शङ्खशुक्तिशम्बूकजलौकामण्डूकगण्डूपदानां चापि दन्ता न भवन्ति । तेऽपि बुद्धिरहिता निर्बलाः अलसा केवलं मांसलाश्च भवन्ति, जीवने साधनमात्रं परेषाम् । तेष्वेकः तिमिंगिलो भवति महाकायः । सोऽपि च मांसलोऽलसश्च भवति । स केवलं स्वजातीयानेव निगिलति मत्स्यान् गेहेशूरो मेदस्वी । न स क्वापि जलाद् बहिर्दर्शयति बलम् ।

सरीसृपाणां च वृश्चिककिलासगृहगोधिकाजगरकभुजङ्गमादीनामपि दन्ता न भवन्तीति तेऽप्यलसा दुर्बला निर्बुद्धयश्च भवन्ति । सर्पाणामपि चर्वणदन्ता न भवन्तीति अपर्याप्तदन्तास्तेऽपर्याप्तबुद्धयः प्रायः स्वप्नशीला अलसाश्च भवन्ति । नकुलमूषकचामरिकाणां भेदकाः दन्ताः भवन्ति । तेषां चर्वणदन्ता न भवन्ति, इति तेऽपि साकल्येन क्षुद्रबुद्धयः संजायन्ते ।

खगा अपि दन्तरहिता भवन्ति । तेऽपि प्रायेण मुग्धाः सन्ति । गोमेषछागमहिषगवयगर्दभक्रमेलकानां च दन्ता न दीर्घा नातिह्रस्वाश्च भवन्तीति तेऽपि मध्यबुद्धयो भवन्ति । वन्यवराहगैण्डकगजराजानां दन्ता भेदकाश्चर्वणाश्चापि भवन्तीति ते बुद्धिमन्तो शूराः शक्तिमन्तश्च भवन्ति । करिणामग्रदन्ताः सुदीर्घा दृढतराश्च भवन्तीति ते बलिष्ठा दक्षाश्च भवन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थं च दृढदन्ता जन्तवो रूपवन्तो देहसंपत्सपन्नाः बुद्धिमन्तः शक्तिशालिनश्च दीर्घायुषश्च सुखिनश्च भवन्तीति मानुषैः दन्ताः सर्व-प्रयत्नेन रक्षणीयाः सन्तीत्यलमत्रविस्तरेण । इदमत्र युज्यते वक्तुम्—

रूपस्यापि बलस्यापि बुद्धेश्चापि चिरायुषः ।
सौख्यस्यापि च सर्वस्य दशनाः सन्ति कारणम् ॥

—०००—

मोघं जीवन्ति ते नराः

(१)

वशन्ति ये न ग्रामर्द्धिं कृषिं ये न च कुर्वते ।
पालयन्ते न ये धेनूः चालयन्ते न ये हलम् ॥
लभन्ते ये न धान्यानि लभन्ते नैव गोघृतम् ।
अकल्पभोजना नित्यं मोघं जीवन्ति ते नराः ॥

(२)

कर्षन्तः कृषिभूमिं ये कर्पासं न वपन्ति किम् ।
चालयन्ते न किं चक्रं वयन्ति किं न खद्दरम् ॥
गान्धिं किमवजानन्ति तस्यादेशं निहन्ति किम् ।
अकल्पवसना लोके मोघं जीवन्ति ते नराः ॥

(३)

पठन्ति चाङ्गलीं भाषां भणन्ति यावनीमपि ।
विद्याः कलाश्च जानन्ति ये न जानन्ति संस्कृतम् ॥
संस्कृतिं स्वां न जानन्ति जीवितुं न विदन्ति ये ।
अकल्पशिक्षणास्ते हि मोघं जीवन्ति मानवाः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(४)

खेलन्ति विविधान् खेलान् व्यायामं कुर्वते च ये ।
ब्रह्मचर्यं न रक्षन्ति नटगायकसङ्गताः ॥
वृत्तहीनाश्च जायन्ते रोगजाले पतन्ति च ।
अकल्पसुखभोगास्ते मोघं जीवन्ति मानवाः ॥

(५)

सूरयः कवयः सन्ति प्रधाना सचिवा अपि ।
ज्ञानिनो लब्धविज्ञाना धर्मज्ञाना न सन्ति ये ॥
सुरक्षिता न ते सन्ति न लोकेषु प्रतिष्ठिताः ।
लकल्पजनुषो लोके मोघं जीवन्ति मानवाः ॥

(६)

नित्यं कुर्वन्ति कार्याणि सुद्योगानाचरन्ति च ।
प्रभूतं धनमर्जन्ति पुण्यं दानं न कुर्वते ॥
लभन्ते ते न चेष्टानि न यशो न धनं पुनः ।
अकल्पपरलोकार्था मोघं जीवन्ति मानवाः ॥

WITH THE BEST COMPLIMENTS FROM:

THE OUDH SUGAR MILLS. LTD.

159 INDUSTRY HOUSE

CHURCHGAE, BOMBAY 20

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाकान् विजेतुम्

[१]

बालोऽपि वृद्धः सबलोऽबलोऽपि
  ददाति धीरो युवकोऽपि कामात् ।
कान्तातिदान्ता रुधिरं भटेभ्यः
  पाकन् विजेतुं युधि मूर्च्छितेभ्यः ॥

[२]

मूर्खोऽपि विद्वानपि किंपचानः
  दान्तोऽपि पीनोऽपृथुलोऽपि लोकः ।
रक्तं भटेभ्यः प्रददाति सर्वः
  पाकान् विजेतुं युधि मूर्च्छितेभ्यः ॥

[३]

छात्रोऽपि शैक्षोऽपि च पाठकोऽपि
  ज्येष्ठोऽपि मुख्योऽपि कनिष्ठकोऽपि ।
रक्तं वरिष्ठो ददते भटेभ्यः
  पाकान् विजेतुं युधि मूर्च्छितेभ्यः ॥

[४]

ग्राम्योऽपि कौद्योऽपि च नागरोऽपि
  सभ्योऽप्यमश्चतुरोऽपि साधुः ।
रक्तं सुजात्यो ददते भटेभ्यः
  पाकान् विजेतुं युधि मूर्च्छितेभ्यः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[५]

गौरोऽपि कृष्णोऽपि च सुन्दरोऽपि
नरः कुरूपोऽपि वरोऽवरोऽपि ।
रक्तं वदान्यो ददते भटेभ्यः
पाकान् विजेतुं युधि मूर्च्छितेभ्यः ॥

दश धर्मं न जानन्ति

मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।
त्वरमाणश्च लुब्धश्च भीतः कामी च ते दश ॥
दश धर्मं न जानन्ति धृतराष्ट्र निबोध तान् ।
तस्मादेतेषु सर्वेषु न प्रसज्यत पण्डितः ॥

श्रीसेञ्च्यूरीवयनविरचनसंङ्घ-संस्थानम्
अनुपमान् वेशवस्त्रभूषाप्रकारानुत्पादयति
तेषां च
विविधानां प्रकाराणां घटयितारः
श्रीसेञ्च्युरीवयनविरचनस्वामिसंघ-
संस्थानमर्यादाधिकरिणः
THE CENTURY SPG. MFG. CO. LTD.
सेञ्च्यूरी भवनम्, डॉ. एनीबेजेण्ट रोड, वरली, बम्बई–२५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दण्डस्य बलम्

हितार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
ब्रह्म तेजोमयं दण्डमसृजत्पूर्वमीश्वरः ॥
तस्य सर्वाणि भूतानि स्थावरचराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च ॥
तं देशकालौ शक्तिं च विद्यां चावेक्ष्य तत्वतः ।
यथार्हतः संप्रणयेन् नरेष्वन्यायवर्तिषु ॥
स राजा पुरुषो दण्डः स नेता शासिता च सः ।
चतुर्णामाश्रमाणां च धर्मस्य प्रतिभूः स्मृतः ॥
दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः स्वप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥
समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः ॥
यदि न प्रणयेद् राजा दण्डं दण्डयेष्वतन्द्रितः ।
शूले मत्स्यानिवाऽपक्ष्यन् दुर्बलान् बलवत्तराः ॥
अद्यात् काकः पुरोडाशं श्वा च लिह्याद्धविस्तथा ।
स्वाम्यं च न स्यात् कस्मिंश्चित् प्रवर्ततेताधरोत्तरम् ॥
सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः ।
दण्डस्य हि भयात् सर्वं जगद्भोगाय कपल्ते ॥
देवदानवगन्धर्वा रक्षांसि पतगोरगाः ।
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीडिताः ॥
दुष्येयुः सर्ववर्णाश्च भिद्येरन् सर्वसेतवः ।
सर्वलोकप्रकोपश्च भवेद् दण्डस्य विभ्रमात् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा ।
प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति ॥

तस्याहुः संप्रणेतारं राजानं सत्यवादिनम् ।
समीक्ष्य कारिणं प्राज्ञं धर्मकामार्थकोविदम् ॥

तं नेता प्रणयन् सम्यक् त्रिवर्गेणाभिवर्धते ।
शोषणः विषमः क्षुद्रो दण्डेनैव निहन्यते ॥

दण्डो हि सुमहत्तेजो दुर्धरश्चाकृतात्मभिः ।
धर्माद् विचलितं हन्ति नेतारमपि कुचक्रिणम् ॥

ततः सैन्यं च राष्ट्रं च लोकं च सचराचरम् ।
अन्तरिक्षगतांश्चैव मुनीन् देवाश्च पीडयेत् ॥

सोऽसहायेन मूढेन लुब्धेनाकृतबुद्धिना ।
न शक्यो न्यायतो नेतुं शक्तेन विषयेषु च ॥

शुचिना सत्यसन्धेन यथाशास्त्रानुसारिणा ।
प्रणेतुं शक्यते दण्डः सुसहायेन धीमता ॥

स्वराष्ट्रे न्यायवृत्तः स्याद् भृशदण्डश्च शत्रुषु ।
सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः ॥

एवं वृत्तस्य संनेतुर्दुर्बलस्यापि धीमतः ।
विस्तीर्यते यशो लोके तैलबिन्दुरिवाम्भसि ॥

उक्ताचारविहीनस्य विनेतुरजितात्मनः ।
संक्षिप्यते यशो लोके घृतबिन्दुरिवाम्भसि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशेऽस्माकं कृषिविद्या, तस्या आधुनिकीकरणे च श्रेष्ठिनां

श्रीकिर्लोस्करबन्धूनां योगदानम्

गुरुः—अहो शिष्याः ! जानीथ यूयम्, देशोऽस्माकमद्यापि वर्तते कृषिप्रधानः

शिष्यः—तर्हि कथं न पर्याप्तमन्नं लभामहे वयम् ?

गुरुः—सन्त्यत्र कानिचित्कारणानि । तेष्वपि कृषिकर्मणः पुराणः प्रकारः प्रथमः । परन्तु नवानि क्षेत्रविद्योपकरणानि कृषिकाणां कृते कृषिकर्मयोगीनि यन्त्राणि च निर्मातुमतिशयं यतामहे वयम् । श्रेष्ठिनः श्रीकिर्लोस्कराश्च तेषामुपकरणानां निर्माणे मुख्याः सन्ति ।

शिष्यः—ननु क्व वर्तते निर्माणशाला तेषाम् ?

गुरुः—श्रेष्ठिनां श्रीकिर्लोस्करबन्धूनां निमार्णशाला हि किर्लोस्करवाड्यां महाराष्ट्रे तिष्ठति । शाखा च तस्याः मध्यप्रदे देवासनगरे वर्तते ।

शिष्यः—ननु कानि कानि उपकरणाणि निर्मान्ति ते ?

गुरुः—ते हलानि, इक्षुपीडनयन्त्राणि बीजवेधानिकाः मक्किकाकणनिहारकान् लघूनि बृहन्ति च जलोत्तोलनयन्त्राणि च निर्मान्ति । ते कृषिविद्योन्नतये उदात्तप्रकारेण सहयोगं ददाना वर्तन्तेऽसम्भ्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितुः पुत्रेण सम्वादः

भीष्म उवाच

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
पितुः पुत्रेण संवादं तं निबोध युधिष्ठिर ॥
द्विजातेः कस्यचित् पार्थ स्वाध्यायनिरतस्य च ।
पुत्रो बभूव मेधावी मेधावी नाम नामतः ॥
सोऽब्रवीत् पितरं पुत्रः स्वाध्यायकरणे रतम् ।
मोक्षधर्मेष्वकुशलं मोक्षधर्मविचक्षणः ॥

पुत्र उवाच

धीरः किंस्वित् तात् कुर्यात् प्रजानन्
क्षिप्रं ह्यायुर्भ्रश्यते मानवानाम् ।
पितस्तथाऽऽख्याहि यथार्थयोगं
ममानुपूर्व्या येन धर्मं चरेयम् ॥

पिता उवाच

अधीत्य वेदान् ब्रह्मचर्येषु पुत्र
पुत्रानिच्छेत् पावनाय पितॄणाम् ।
अग्नीनाधाय विधिवच्चेष्टयज्ञो
वनं प्रविश्याथ मुनिर्बुभूषेत् ॥

पुत्र उवाच

एवमभ्याहते लोके सर्वतः परिवारिते ।
अमोघासु पतन्तीषु किं धीर इव भाषसे ॥

पितोवाच

कथमभ्याहतो लोकः केन वा परिवारितः ।
अमोघा का पतन्तीह किं भीषयसीव माम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुत्र उवाच

मृत्युनाभ्याहतो लोको जरया परिवारितः ।
अहोरात्राः पतन्तीमे तच्च कस्मान्न बुध्यसे ॥
यदाऽहमेवं जानामि न मृत्युस्तिष्ठतीति ह ।
सोऽहं कथं प्रतीक्षिष्ये ज्ञानेनापिहिताश्चरन् ॥
रात्र्यां रात्र्यां व्यतीतायामायुरल्पतरं यदा ।
गाधोदके मत्स्य इव सुखं विन्देत कस्तदा ॥
पुष्पाणीव विचिन्वितमन्यत्र गतमानसम् ।
अनवाप्तेषु कामेषु मृत्युरभ्येति मानवम् ॥
श्वः कार्यमद्यकुर्वीत पूर्वाह्णे च पराह्णिकम् ।
नहि मृत्युः प्रतीक्षेत कृतं वास्य न वा कृतम् ॥
अद्यैव कुरु यच्छ्रेयो मा त्वां कालोऽत्यगान् महान् ।
को हि जानाति कस्याद्य मृत्युकालो भविष्यति ॥
अकृतेष्वेव कार्येषु मृत्युर्वै सम्प्रकर्षति ।
अद्यैव धर्मशीलः स्यादनिमित्तं हि जीवितम् ॥
कृते धर्मे भवेत् प्रीतिरिह प्रेत्य च शास्वती ।
मोहेन हि समाविष्ट पुत्रदारार्थमुद्यतः ॥
कृत्वा कार्यमकार्यं वा तुष्टिमेषां प्रयच्छति ।
तं पुत्रपशुसम्पन्नं व्यामक्तमानसं नरम् ॥
सुप्तं व्याघ्रं महौघो वा मृत्युरादाय गच्छति ।
संचिन्वानकमेवैनं कामानामवितृप्तकम् ॥
वृकीवोरणमासाद्य मृत्युरादाय गच्छति ।
इदं कृतमिदं कार्यमिदमन्यत् कृताकृतम् ॥
एवमीहा समायुक्तं मृत्युरादाय गच्छति ।
कृतानां फलमवाप्यैव कार्याणां कर्मसङ्गिनाम् ॥
क्षेत्रापणगृहासक्तं मृत्युरादाय गच्छति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्बलं बलवन्तं का प्राज्ञं शूरं कविं जडम् ।
अप्राप्तसर्वकामार्थं मृत्युरादाय गच्छति ॥
मृत्युर्जरा च व्याधिश्च दुःखं चानेककारणम् ।
असंत्याज्यं यदा मर्त्यैः किं स्वस्थ इव तिष्ठसि ॥
जातमेवाऽन्तकोऽन्ताय जरा चाभ्येति देहिनम् ।
अनुसक्ता द्वयेनैते भावाः स्थावरजङ्गमाः ॥
न मृत्युसेनामायान्तीं जातु कश्चित् प्रबाधते ।
बलात् सत्यमृते त्वेकं सत्ये ह्यमृतमाश्रितम् ॥
मृत्योर्वा गृहमेतद् वै या ग्रामे वसतो रतिः ।
देवानामेष वै गोष्ठो यदरण्यमिति श्रुतिः ॥
निबन्धनी रज्जुरेषा या ग्रामे वसतो रतिः ।
छित्वैनां सुकृतो यान्ति नैनां छिन्दन्ति दुस्कृतः ।
यो न हिंसति सत्वानि मनोवाक्कर्महेतुभिः ।
जीवितार्थपनयनैः प्राणिभिर्न स बद्धयते ॥
तस्मात् सत्यव्रताचारः सत्यव्रतपरायणः ।
सत्यकामः समोदान्तः सत्यैनेवान्तुकं जयेत् ।
अमृतं चैव मृत्युश्च द्वयं देहे प्रतिष्ठितम् ।
मृत्युरापद्यते मोहात् सत्येनापद्यतेऽमृतम् ॥
सोऽहं सत्यमहिंसार्थी कामक्रोधबहिष्कृतः ।
समासृत्य सुखं क्षेमी मृत्युं हास्याम्यु मृयुवत् ॥
शान्तियज्ञरतो दान्तो ब्रह्मयज्ञे स्थितो मुनिः ।
वाङ्मनःकर्मयज्ञश्च भविष्यामुदगायने ॥
पशुयज्ञैः कथं हिंस्रैर्मादृशो यष्टुमर्हति ।
अन्तवद्भिरतः प्राज्ञः क्षत्रयज्ञैः पिशाचवत् ॥
आत्मन्येवात्मना जात आत्मनिष्ठोऽप्रजः पितः ।
आत्मयज्ञो भविष्यामि न मां तारयति प्रजाः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्य वाङ्मनसी स्यातां सम्यक् प्रणिहिते सदा ।
तपस्त्यागश्च योगश्च स वै सर्वमवाप्नुयात् ॥

नैतादृशं ब्राह्मणस्यास्ति वित्तं
यथैकता समता सत्यता च ।
शीले स्थितिर्दण्डनिधानमार्जवं
ततस्ततश्चोपरमः क्रियाभ्यः ॥

किं ते धनैर्बान्धवैर्वापि किं ते
किं ते दारैर्ब्राह्मण यो मरिष्यसि ।
आत्मानमन्वेष्टि गुहां प्रविष्टं
पितामहास्ते क्व गताः पिता च ॥

पुत्रस्यैतद् वचः श्रुत्वा तथाऽऽकार्षीत् पिता नृप ।
तथा त्वमपि वर्तस्व सत्य धर्मपरायणः ॥

—•—

You will marvel
at
MARBLEX
The new flooring from
BHOR
The Bhor Industries Ltd.
386, Veer Savarkar Marg
Bombay 25-DD
(Telephone: 455979/457108)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनः स्वकीयं प्रददाति वोटम्

[१]

रसानशेषान् जगती नभः खं
तेजः प्रकाशं दिशति प्रजाभ्यः ।
स्नेहान् जलं प्राणबलं च वायुः
स्वीयं परस्मै ददते वदान्याः ॥

[२]

मधूनि यच्छन्ति फलानि वृक्षाः
पयांसि नद्यो ददते हितानि ।
स्वर्णादिधातूनखिलान् महीध्राः
स्वीयं परस्मै प्रदिशन्त्युदाराः ॥

[३]

पयः प्रयच्छन्ति जनाय गावः
ददाति महिषी दुग्धं घृतं च ।
ऊर्णायुरुर्णां दिशति प्रशस्तां
स्वीयं परस्मै ददते वदान्यः ॥

[४]

जलानि पेयानि ददाति कूपः
सरोऽपि वारीण्यवगाहनाय ।
रत्नान्यमूल्यानि ददाति सिन्धुः
परोपकारं कुरुते वदान्यः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[५]

लोकस्य दारिद्र्यनिवारणाय
कांग्रेसनेता वचनं ददाति ।
परोपकाराय वदान्यधन्यो
जनः स्वकीयं प्रददाति वोटम् ॥

It is the loving mother's secret savings for her little darling
CENTRAL has facilities for Home Savings and many other savings schemes too.

CENTRAL BANK OF INDIA

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्माकं गृहम्

---०---

गृहम् अस्माकं गेहम्, आगारम्, सदनम्, वेश्म, सद्म निकेतनम्, निवासः भवनम्, आवासः आयातनम्, आलयः, ओकः, धाम वसतिः, शरणम्, जन्मभूमिः वा कथ्यते ।

नृपाणां गृहं सौधम्, प्रसादः, पत्तनं वा उच्यते । गवां गृहं गोष्ठम्, अश्वशाला अश्वानाम्, गजशाला गजानाम्, नीडानि खगानाम्, गुल्मगह्वराणि मृगाणाम्, शैलगह्वराणि सिंहानाम्, जलाशयश्च मत्स्यजातीयानां गृहाणि । गृहम् अस्माकं मृण्मयम्, इष्टिकामयं पाषाणमयम् तृणमयं वा भवति ।

गृहम् किमपि अद्भुतं परम् प्रियं च वस्तु देहिनाम् । सर्वोऽपि गृहे स्वाधीनो भवति, सुखी भवति सज्जति च। न कश्चित् क्षणमपि विस्मरति गृहम् । गृहं हि जन्मभूमिः जीवनाम् । यः यत्र गृहे जन्म लभते तस्य तत्र गृहं जन्मभूमिः मातृभूमिः गेहं वा भवति । यथा बालः क्षणमपि मातरं न विस्मरति, तथैव बहिर्गतः, दूरदेशं गतो वापि जनः क्षणमपि गृहभूमिं न विस्मरति ।

न गृहात् सुन्दरं सुभगं शोभनं मधुरं मनोहरं रमणीयं रम्यं कान्त कमनीयं च वस्तु संजायते जगत्यस्मिन् । सुदूरदेशं भ्रान्त्वा भ्रान्त्वा अपि वयं स्वगेहं निवर्तामहे । पक्षिणः स्वनिकेतनं नीडं विहाय सुदूरमाहाराय गच्छन्ति, निवर्तन्ते च तदेव सायं पुनः त्वरितम् । गावः गोष्ठं विहाय चरितुं दूरं प्रयान्ति, प्रतिप्रयान्ति च तदेव पुनः सायम् । मृगाः आवासं विहाय दिवा वने भ्रमन्ति परापतन्ति च पुना रात्रौ निजवासम् । गृहं खलु शरणं शरीरिणाम् देहे प्राणा इव गेहे शरीरी आनन्दमनुभवति । प्राणिनः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इह स्थानान्तरम् ग्रामानान्तरं देशान्तरं लोकान्तरं वा व्रजन्ति खलु, न ते कदापि तेषां गेहसुखानि विस्मरन्ति । सर्वोऽपि गेहेऽनुरज्जति, निर्विशति सुखानि, प्रीतिमान् भवति, अनुरागं दृढयति, आसक्तिं बध्नाति, वत्सल्यं व्यनक्ति निवसति च निर्भयम् ।

गृहेऽस्माकं माता पिता भगिन्यः भ्रातरः भ्रातृजायाः बन्धवा मित्राणि च सन्ति । गेहेऽस्माकं वस्त्राणि भूषणानि पुस्तकानि अन्यान्यपि च नित्योपयोगीनि सुखोपकरणानि भवन्ति । गृहे सौख्यमस्ति, आनन्दः अस्ति, कुशलमस्ति, भद्रमस्ति, हर्षः अस्ति विनोदाः सन्ति, उत्सवाश्च भवन्ति, । गृहेऽमाकं गावाः सन्ति, महिष्यः सन्ति, दुग्धं दधि घृतं च भवति । गृहेऽस्माकं चोष्यं पेयं लेह्यं भोज्यं भक्ष्यं भोग्यं च सर्वं वर्तते । तत्र पाठयं पठनीयं साहित्यं सगीतं गेयं वाद्यं चापि लभ्यते । गेहे वयं देहे आत्मा इव सुखेन निःशंका निवसामः । स्वर्गान्न हीयतेऽस्माकं गेहमितत्यलं जन्मभूमेः प्रशंसनम् । इदमत्रोच्यते--

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।
जननी जनयते जीवं संजीवयति जन्मभूः ॥

BHARAT VELVET

Monufacturers of
Velvet—Velveteens & Corduroy
Props: Aditya Textile Industries P. Ltd.

Mills:	Regd. Office:
Kurla-Andheri Road,	631, Gazdar House,
Bombay-72AS.	Girgaum Road, Bombay-2.
Tel;No: 551826/27/28.	Tel : 310187.

Grms : SAMTULA

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कादम्बरी-कथा

(प्रथमादङ्कादनुसृतम्)

निगडितौ इव वर्तते मम चरणौ, इत्यलं निर्बन्धेन। इत्युक्त्वा किमपि नष्टमिवान्विष्यन् लतागहनेषु सरस्तीरेषु पर्यटत्। ततस्तु। तं प्रतिबोधयन्त दिनत्रयं स्थित्वा हताशाः सेवापरिकरं तत्र नियुज्य परायाता वयम्। चन्द्रापीडस्तु स्वप्नेऽपि असंभाव्यं वैशम्पायनवृत्तान्तमाकर्ण्य सहसा उद्वेगविस्मयाभ्यामाक्रान्तहृदयोऽजायत। किं पुनः ईदृशस्य वैरागस्य कारणं भवेद् इति बहुधा विचिन्त्य प्रकारान्तरेण कादम्बरीसमीपगमनमुत्पादयता उपकृतमेव मित्रवृत्तान्तेन इति निश्चित्य उज्जयिनीं परापतिवान्। तत्र च दुःखेन मात्रा पित्रा च विसर्जितः शुकनाशं मनोरमां च प्रणम्य आरुह्य चेन्द्रायुधं जवेन नगर्य्याः निरगच्छत्, निर्गत्य च ताम्यता हृदयेन किमपि गाढं चिन्तयन् दिवारात्रमचलत्। मार्गे प्रावृट् प्रारब्धा। तत्रापि निरन्तरं वहन् वाजिसैन्येनानुगम्यमानोऽच्छोदं सरोऽप्राप्नोत्। तत्र च तुरगस्थ एव विचिन्वन् वैशम्पायनं समन्ताद् अभ्रमत्। यदा तु नालक्षितवान् किमप्यभिज्ञानम्, तदा महाश्वेता कदाचिदस्य वृत्तान्तस्य अभिज्ञा भवेद् इति विचिन्त्य तदाश्रमविशत्। तत्र च गृहद्वारे एव तरलिकया विधृतशिरां स महाश्वेतामपश्यत्, अपृच्छच्च किमेतत् इति तरलिकाम्। अथ महाश्वेतैवाऽब्रवीत्- महाभाग! केयूरकाद् भवतः उज्जयिनीगमनं श्रुत्वा कष्टतरतपश्चरणाय यावदहमत्रागता, तावदेव भवतः तुल्याकृतिं ब्राह्मणयुवानमपश्यम्। स तु मामुपसृत्य प्रत्यभिजानन्निव मामवलोकयन्नब्रवीत्—सुतनु! सर्वोऽपि जनः जगति वयसः सदृशमाचरति, तव पुनः किमर्थं विसदृशानुष्ठानम्।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महर्षेर्व्यासस्योपदेशः

शीलं प्रधानं पुरुषे तद्यस्येह प्रणश्यति ।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः ॥

न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः ।
अन्तेष्वपि हि जातानां वृत्तमेव विशिष्यते ॥

त्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते ॥

य एव यत्नः क्रियते परराष्ट्रविमर्दने ।
स एव यत्नः कर्त्तव्यः स्वराष्ट्रपरिपालने ॥

वृत्तं यत्नेन संरक्षेत् वित्तमायाति याति ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥

द्यूतमेतत् पुराकल्पे दृष्टं वैरकरं नृणाम् ।
तस्मात् द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ॥

परं क्षिपति दोषेण वर्तमानः स्वयं तथा ।
यश्च क्रुध्यत्यनीशानः स च मूढतमो नरः ॥

अनुग्राहकेषु ग्राहकेषु

येषां भवतां शुल्कं शिष्टं वर्तते तैः शीघ्रं प्रहेयम्, इति प्रार्थयते-- --प्रबन्धसंपादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चाणिक्य-नीतिः

—०—

साधूना दर्शनं पुण्यं तीर्थभूता हि साधवः ।
कालेन फलते तीर्थं सद्यः साधुसमागमः ॥

विप्रास्मिन् नगरे महान् कथय कः तालद्रुमाणां गणः
को दाता रजको ददाति वसनं प्रातर्गृहीत्वा निशि ।
को दक्षः परवित्तदारहरणे सर्वोऽपि दक्षो जनः
कस्माज्जीवसि हे सखे विषकृमिन्यायेन जीवाम्यहम् ॥

न विप्रपादोदककर्दमानि न वेदशास्त्रध्वनिगर्जितानि ।
स्वाहास्वधाकारविवर्जितानि श्मशानतुल्यानि गृहाणि तानि ॥

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा ।
शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः ॥

अनित्यानि शरीराणि विभवो नैव शाश्वतः ।
नित्यं सन्निहितो मृत्युः कर्त्तव्यो धर्मसंग्रहः ॥

निमन्त्रणोत्सवा विप्रा गावो नवतृणोत्सवाः ।
पत्युत्साहयुता भार्या अहं कृष्ण ! रणोत्सवः ॥

मातृवत्परदारेषु परद्रव्येषु लोष्ठवत् ।
आत्मवत्सर्वभूतेषु यः पश्यति स पश्यति ॥

धर्मे तत्परता मुखे मधुरता दाने समुत्साहिता
मित्रेऽवञ्चकता गुरौ विनयता चितेऽतिगम्भीरता ।
आचारे शुचिता गुणे रसिकता शास्त्रेषु विज्ञातृता
रूपे सुन्दरता हरौ भजनिता सत्स्वेव संदृश्यते ॥

काष्ठं कल्पतरुः सुमेरुरचलश्चिन्तामणिः प्रस्तरः
सूर्यस्तीव्रकरः शशी क्षयकरः क्षारो हि वारां निधिः ।
कामो नष्टतनुर्बलिर्दितिसुतो नित्यं पशुः कामगौः
नैतांस्ते तुलयाम्यहं नृप गुणान् कस्योपमादीयते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

क्रमशः

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूज्या माता साऽस्तेऽस्माकम्

अस्मद्गेहे एका धेनुः ।
वत्सस्तस्याः कान्तः कान्तः ॥१॥
गाढप्रेम्णा सा तं लेढि ।
दत्ते तस्मै प्राज्यं दुग्धम् ॥२॥
धेनोः पादाः पुण्याः पुण्याः ।
तस्याः शृङ्गे दीर्घे दीर्घे ॥३॥
तस्याः कर्णौ लम्बौ लम्बौ ।
तस्या नेत्रे तीक्ष्णे तीक्ष्णे ॥४॥
रम्यौ नासारन्ध्रौ तस्याः ।
सास्ना तस्या नीचैर्लम्बा ॥५॥
ऊधस्तस्याः पीनः पीनः ।
तस्यास्तन्याः लम्बा लम्बाः ॥६॥
वर्षे वर्षे सूते वत्सम् ।
सा मे दुग्धं दत्ते मिष्टम् ॥७॥
खल्यं भुंक्ते भुंक्ते धान्यम् ।
घासं भुंक्ते सा सौख्येन ॥८॥
आपः कौपाः तस्याः पीतिः ।
[illegible] स्वादम् ॥९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चर्तुं याति प्रातः प्रातः ।
सा प्रत्येति सायं सायम् ॥१०॥
तस्याः पूजां कुर्मो नित्यम् ।
पूज्या माता साऽऽस्तेऽस्माकम् ॥११॥

मातृपितृगुरूणां- महत्त्वम्

(१)

पितरं मातरं विद्यामन्त्रदं गुरुमेव च ।
यो न पुष्णाति पुरुषो यावज्जीवं च सोऽशुचिः ॥

(२)

सर्वेषामेव पूज्यानां पिता वन्द्यो महान् गुरुः ।
पितुः शतगुणा माता गर्भधारणपोषणात् ॥

(३)

माता च पृथिवीरूपा सर्वेभ्यश्च हितैषिणी ।
नास्ति मातुः परो बन्धुः सर्वेषां जगतीतले ॥

(४)

विद्या–मन्त्रप्रदः सत्यं मातुः परतरो गुरुः ।
नहि तस्मात् परः कोऽपि वन्द्यः पूज्यश्च वेदतः ॥

(५)

तस्माद् विद्यागुरुः पूज्यः पूज्यौ च पितरौ सदा ।
येषां शुभाभिराशीर्भिः कल्याणं जायते नृणाम् ॥

एषु पद्येषु कन्या छन्दः, 'ग्मौ चेत्' कन्या इति लक्षणात् । सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनयस्य महत्वम्

(१)

वृद्धांश्च नित्यं सेवते विप्रान् वेदविदः शुचीन्।
वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते ॥

(२)

तेभ्योऽभिगच्छेद्विनयं विनीतात्माऽपिनित्यशः।
लोकनेता विनीतस्तु न विनश्यति कर्हिचित् ॥

(३)

बहवोऽविनयान्नष्टा नेतारश्च नृपा अपि।
वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे ॥

(४)

वेनो विनष्टोऽविनयान् नहुषश्चैव पार्थिवः।
सुदा पैजवनश्चैव सुमुखो निमिरेव च ॥

(५)

पृथस्तु विनयाद्राज्यं प्राप्तवान् मनुरेव च।
कुबेरश्च धनैश्वर्यं ब्राह्मण्यं चैव गाधिजः ॥

(६)

औरङ्गजेबोऽविनयी नष्टो हिटलरोऽपि च।
यवना भारतान्नष्टाः प्रगल्भा आङ्गला अपि ॥

(७)

नष्टास्तेऽविनयादेव पाकिस्तानविधायिनः।
जिन्ना च विनयी यहया भुट्टो नष्टः प्रमादतः ॥

(८)

विनीतः पूज्यते नेता विनीतः पूज्यते कविः।
विनीतः पूज्यते मन्त्री तस्माद्विनयमाचरेत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्तयः

बलं मूर्खस्य मौनित्वम् ।
कुराजान्तानि राष्ट्राणि ।
क्रोधो मूलमनर्थानाम् ।
छिद्रेष्वनर्था बहुलीभवन्ति ।
नये च शौर्ये च वसन्ति सम्पदः ।
अविवेकः परमापदां पदम् ।
तेजसां हि न वयः समीक्ष्यते ।
पदं हि सर्वत्र गुणैः निधीयते ।
क्रिया हि वस्तूपहिता प्रसीदति ।
निपातनीया हि सतामसाधवः ।
कथापि खलु पापानमलमश्रेयसे यतः ।
व्रताभिरक्षा हि सतामलंक्रिया ।
आकृतिविशेषेष्वादरः पदं करोति ।
कार्येष्ववश्याकार्येषु सिद्धये क्षिप्रकारिता ।
न खलु धीमतां कश्चिद् अविषयो नाम ।
सतां केनापि कार्येण लोकस्याराधनं व्रतम् ।
सन्तापकारिणो बन्धुजनविप्रयोगा भवन्ति ।
स्वभावो नोपदेशेन शक्यते कर्त्तुमन्यथा ।
दुरधीता विषं विद्या अजीर्णे भोजनं विषम् ।
न च विद्यासमो बन्धुर्न च व्याधिसमो रिपुः ।
शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोपरि ।
शक्याशक्यपरिसंख्यानशून्याः प्रायणे स्वाद्वैतृपः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

LAST WORD IN
FASHION FABRICS

ASHOK

- Sarees
- Velvet
- Suitings
- Brocades
- Embroideies
- Shirtings

AVAILABLE AT

ASHOK SILK MILLS

RETAIL SHOP

406, Lalsıngh Bldg., Near Crawford, market,
Sheikh Menon Street, Bombay-2.

मुरारजी गोकलदास मिल्स

स्पिनिंग एण्डवीविंग क० लि०

द्वारा निर्मित वस्त्रों की खरीदगी के लिये याद रखिए—
मिनलर खाकी, विविध ड्रिल्स्, धोतियां, साड़ियां, गादलापाट,
चादरें, लाँगक्लाथ, कोटिंग, शर्टिंग, वायल, मलमल, तथा
विभिन्न प्रकार के मसराईज्डसूती वस्त्रों की
प्राप्ति का सर्वोत्तम स्थान है।

डा. अंबेडकर रोड, परेल, बम्बई नं. १२

फोन नं. : ६००२१ — तार : 'मोगोको' बम्बई.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्माकं प्रकाशनानि

		रु. पैसे
संस्कृतव्याहारः	भागाः १-५	०.७५
सप्त विभक्तयः		०.७५
पञ्च सन्धयः		०.७५
संस्कृतप्रवेशिका	भागाः १-३	०.७५
बालनीतिकथाः	भागाः १-८	०.[illegible]
संस्कृतसोपानम्	भागाः १-३	१.२५
प्रहेलिकाशतकम्		०.५०
संभाषा	भागाः १-५	०.६२
संभाषा English	" "	०.६२
लौकिकन्यायरत्नमञ्जूषा		१.२५
संस्कृतप्रबन्धचन्द्रिका	भागाः १-३	१.२५
सुन्दरं संस्कृतम्	" "	०.७५
कुमारसंभवम्	[संक्षिप्तगद्यम्]	०.७५
रघुवंशम्	"	०.७५
भारतीयमहापुरुषाः		१.२५
संस्कृतवर्णमाला		१.००
चाणक्यनीतिः		१.२५
चाणक्यसूत्राणि		०.७५
बालरामायणम्		०.७५
साधुसुभाषितम्		०.७५
लघुनिबन्धावली		१.००
समासाः		०–५०
कृदन्ताः		०.५०
शालेयसुभाषितानि		०.६२
कादम्बरी-कथा	[संक्षिप्तगद्यम्]	०.६२

✦ बालसंस्कृतकार्यालयः ✦

लालबहादुरशास्त्री मार्ग, घाटकोपर, बम्बई ८६

वैद्य-रामस्वरूपशास्त्रिणा, भारतीयमुद्रणालये घाटकोपरे मुद्रयित्वा प्रकाशितम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्षः २३

गुरुकुल कांगड़ी

बालसंस्कृतम्

अङ्कः ४

विश्वसंस्कृतसम्मेलनाङ्कः

सम्पादकौ— वैद्य-रामस्वरूपशास्त्री आयुर्वेदाचार्यः
नन्दनन्दनः सनाढ्यः एम. ए.

वार्षिकं शुल्कं सप्त रूप्यकम्

बालसंस्कृतकार्यालयः लालबहादुरशास्त्री मार्ग, घाटकोपर, बम्बई ८६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Phone: 298282(6 lines) Gram: KESUWORKS

THE KESAR SUGAR WORKS LTD.

Regd. Office

New Great Insurance Building,
7, Jamshedji Tata Road
Chuchgate Reclaimation
BOMBAY 20 B,

Industial Products at :

BAHERI (U.P.) GOREGON (BOMBAY-62)

Best Qnality Cristal Sugar, Sodium Sulphite,
Sodium Bisulphite, Hypo, Hydroquinone
Sodium & otassium Metabisulphite
Potash Chrome Alum for Photo-
graphic, Textiles, and anning
Industries.

Industrial Alcohal ElectroPlating Chemicals
Rectified and Methylated Spirits etc.
Chromic Acid, Chrome Salt, Nickel
Sulphate, Nickel Chloride,
Nickel Cardonate Dry
Powder, Nickel
Ammonium
Sulphet etc.
Salts

TRADE ENQUARIES ARE SOLICITED

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

हंहो ! भारतीयसंस्कृतिसपन्नमानसाः सुहृदः !

भारतं नाम जगतां कर्त्तुः दृशि विशेषो देशः । यत्र सर्वसामर्थ्यपरीतो भगवान् जगदीश्वरः स्वयमवतरति रक्षणार्थं भक्तानाम् । समस्तं भारतं प्राकृतेन दिव्येन च वैभवेन परिपूर्णं वर्वर्ति । यत्र हिमालयसदृशाः सर्वरत्नपूर्णाः सन्ति गिरिराजाः, रत्नाराशयः सन्ति सप्तवारांनिधयः, काश्मीरसदृशाः, सन्ति उद्यानप्रायः सर्वशोभासमृद्धाः संपत्सम्पन्नप्रदेशाः । परमपवित्रसलिला गङ्गायमुनागोदावरीसमाः महानद्यः । दिल्लीकलिकातामुम्बापुरीमद्रासप्रभृतीनि सर्वविधव्यापारसमृद्धानि सन्ति महानगराणि । श्रीरामकृष्णनृसिंहादिरूपेणावतीर्य सदैव परित्राति जगदीश्वरो भारतम् । भारते एव सर्वज्ञकल्पाः आसन् मुनयः । आदिकविः वाल्मीकिः अत्रिवशिष्ठव्यासादयो द्रष्टारः, ध्रुवप्रह्लादविभीषणहनुमदादयो भक्ताः, परशुरामविभीषणाञ्जनेयव्यासादयो दीर्घायुषः, मान्धातृदशरथयुधिष्ठिरादयाश्च चक्रवर्तिनो राजानः कपिलकणादपाणिनिपतञ्जलिप्रभृतयो विद्वांसः, विक्रमभोजभर्तृहरिप्रभृतयः संस्कृतानुरागिणः, अनुसूयाऽरुन्धतीसीतासावित्रीप्रभृतयो देव्यः शोभयन्ते स्म भारतम् । ज्ञानानां निधानानि वेदा भारते एवाविरभवन् । गणितविज्ञानमध्यात्मतत्त्वं च भारतस्य स्वकीयं मौलिकं बुद्धिवैभवम् । रामायणं महाभारतं गीता भागवतं च सन्ति भारते विश्वस्य कल्याणहेतवो ग्रन्थाः, येषां पठनेन श्रवणेनापि च सिद्ध्यन्ति मनोरथाः मानुषाणाम् ।

भारतं न केवलं स्वर्गभूमिः अपि तु पवित्रं तीर्थस्थलं कर्मक्षेत्रम्, निधानं सर्वविद्यानां ज्ञानगुरुश्च सर्वदेशानाम् । परमोदारा वर्तते भारतीया संस्कृतिः सर्वकल्याण कामा ।

> सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
> सर्वे भद्राणि पश्यन्तु न कश्चिद् दुःखभाग्भवेत् ॥

भारतप्रसूतेभ्यो द्विजेभ्यः सर्वे लोकाः चरित्राणि लेभिरे इति मनुराह—

> एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
> स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

संस्कृतं भारतस्य दिव्यं कामधुक् वाक् । संस्कृतमाध्यमेन सर्वमपि ज्ञानं विज्ञानं विद्याः कलाश्चैकत्र समायान्ति । सर्वविद्यानि शास्त्राणि महर्षिभिः संस्कृते एव लिखितानि । संस्कृतं विश्वस्य प्रथमा भाषा जननी चान्यासाम् । संस्कृतज्ञानं प्राथम्यमर्हति । अनतिपूर्वं राजधान्यां दिल्ल्यां विश्वसंस्कृतसम्मेलने वैदेशिकैः विद्वद्भिः संस्कृतस्य महत्त्वं प्रदर्शितम् । विदेशेषु वर्धते खलु भारतीयायाः संस्कृतेः प्रभावः प्रचारश्च संस्कृतस्य । इदानीं भारतीयः सर्वकारः संस्कृतप्रचारं कामयते इति शुभं संदिश्यते-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

वैद्य—रामस्वरूपशास्त्री

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मरत्नः श्रेष्ठी श्री गदाधरदासः सोमानी

संस्कृतं मण्डयत्येष संस्कृतिं चापि भारतीम् ।
सोमानीवंशभ्राजिष्णुः धर्मरत्नो गदाधरः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः
दिल्ली-शिक्षा-निदेशालयेन राजस्थान-शिक्षा-विभागेन च मान्यता-प्राप्तम्
सरस्वती श्रुतिमहती महीयताम्

बालसंस्कृतम्

पुरे ग्रामे गृहे कुट्यां बाले वृद्धे युवस्वपि।
संस्कृतस्य प्रचाराय प्रभूयाद् बालसंस्कृतम्॥

वर्षम् २३] सम्बत् २०३० वि. वैशाखः, अप्रैलः १९७२ ख्रि. [अङ्कः ४

वैदिकः शान्तिपाठः

ॐ शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद् वक्तारमवतु। अवतु माम्। अवतु वक्तारम्।

ॐ शान्तिः शान्तिः शान्तिः

ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु। मा विद्विषावहै।

ॐ शान्तिः शान्तिः शान्तिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वसंस्कृतसम्मेलनम्

सुहृदो विद्वांसः !

जानन्त्येव भवन्तः यद् दिल्लयां गतमार्चस्य २६ दिनाङ्कात् आरभ्य सप्ताहं यावत् तत्र स्थिते विज्ञानभवने विश्वसंस्कृत सम्मेलनमभवत। भारतराष्ट्रपतिः माननीयः श्रीवाराहवेङ्कट. गिरिः महाभागोऽस्य समुद्घाटनमकरोत्।

दूरदूरेभ्यो विदेशेभ्यश्च समायातानां तत्र प्रतिनिधीनां निवासस्थलस्य भोजनपानादिकस्य च प्रबन्धः यथासौकर्यं विभिन्नेषु स्थानेषु आसीत्। आयोजनस्य कृते यामुने पुलिने राजघट्टस्य समीपे संस्कृतनगरं निर्मितम् अभवत्। अधिवेशनस्य कृते अन्यान्यापि भव्यानि भवनानि निर्मितान्यभवन्। मध्येग्रीष्मं सम्पद्यमानस्य विश्वसम्मेलनस्य कृते समागतानां स्नानपानद्यर्थं जलस्य सुप्रबन्धः आसीत्। भोजनस्य प्रातराशस्यापि समीचीनः प्रबन्ध आसीत्। शयनार्थं पर्यङ्कानां प्रबन्धे आसीत्। स्वस्वस्थानेभ्यो यथासमयं विज्ञानभवनं यातुं मोटरयानानां प्रबन्ध आसीत्।

सम्मेलनेऽस्मिन् भारतस्य सर्वेभ्यः प्रान्तेभ्यः महान्तो विद्वांसः, भारताद्बहिः जर्मनजापानाङ्गलण्डणाऽमेरिकादिभ्यः दूरदेशेभ्यः सुयोग्याः संस्कृतज्ञाः प्रतिनिधयः समागच्छन्। सम्मेलनेऽस्मिन् बह्वयः संस्कृतनार्योऽपि भागमगृह्णन्। अभिनवमिदं संस्कृतविदुषां महासम्मेलनं महत्वपूर्णमासीत्।

सम्मेलनेऽस्मिन् विभिन्नानां परिषदां कार्यक्रमाः संस्कृत. भाषायां, मध्ये मध्ये च आङ्गलभाषायमपि प्राचलन्। कार्यक्रमपत्राणि चात्र आङ्गलभाषायां मुद्रितानि आसन्। सोऽयं संकरः कार्यक्रमः कतिपयविशेषसंस्कृतपक्षपातिमां रुचये नाऽभूत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्मेलनेऽत्र निबन्धपाठा अपि आसन् । सम्मेलनेऽस्मिन् सस्वरं वेदपाठा अपि अभवन् ।

अस्मिन्नवसरे श्रीवीरेन्द्रब्रह्मचारिमहानुभावेन स्वशिष्याभ्यां योगविद्यायाः प्रदर्शनमपि कारितम् । तच्च सभ्यैः भूरिवारं प्रशंसितम् । हैद्राबादस्थः श्रीगुण्डैरावहरकरे महोदयः स्वरचितमष्टाध्यायीयन्त्रं प्रदर्शयति स्म ।

रात्रिकार्यक्रमेषु गीतगोविन्दगानं विक्रमोर्वशीयमेघदूत मोदनीयाऽनारकलीनाटकादीनां प्रदर्शनं चापि सभ्यानां मनोविनोदाय प्राकल्पत । '३१ तमे दिनाङ्के सायं कविसम्मेलने बहवः कवयः स्वस्वकविता अपठन् ।

एतादृशैः संस्कृतविद्वत्सम्मेलनैः सर्वस्मिन् जगति संस्कृतस्य प्रचारः प्रसारश्च च भवतीति योजकाः केन्द्रीयसर्वकारः तस्य कर्त्तारश्च बहुशो धन्यवादानां भाजनानि सन्ति ।

—०—

षडिमे षट्सु जीवन्ति

—०—

चौराः प्रमत्ते जीवन्ति व्याधितेषु चिकित्सकाः ।
प्रमदाः कामयानेषु यजमानेषु याजकाः ॥
राजा विवदमानेषु नित्यं मूर्खेषु पण्डिताः ।
षडिमे षट्सु जीवन्ति सप्तमो नोपलभ्यते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गीतायामात्मनः स्वरूपम्

—o---

[१]

न जायते म्रियते वा कदाचित्
नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥

[२]

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ ! कं घातयति हन्ति कम् ॥

[३]

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णानि
अन्यानि संयाति नवानि देही ॥

[४]

नैनं छिन्दति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ।

[५]

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥

[६]

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[७]

जातस्य ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥

[८]

अव्यक्तादीनि भूतानि व्यक्तामध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥

[९]

आश्चर्यवत् पश्यति कश्चिदेनं
आश्चर्यवद् वदति तथैव चान्यः ।
आश्चर्यवत् चैनमन्यः शृणोति
श्रुत्वाऽप्येनं वेद न चैव कश्चित् ॥

[१०]

देही नित्यमवध्योऽय देहे सर्वस्य भारत ।
तस्मात् सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥

परोपकारः

श्रूयतां धर्मसर्वस्वं यदुक्तं ग्रन्थकोटिषु ।
परोपकारः पुण्याय पापाय परपीडनम् ॥
परोपकारः कर्तव्यः प्राणैरपि धनैरपि ।
परोपकारजं पुण्यं न स्यात् क्रतुशतैरपि
परोपकारशून्यस्य धिङ्मनुष्यस्य जीवितम् ।
जीवन्तु पशवो येषां चर्माप्युपकरिष्यति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम् ॥
श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः खलु सज्जनानां परोपकारेण न चन्दनेन ॥
पिबन्ति नद्यः स्वमेव नाम्भः स्वयं न खदन्ति फलानि वृक्षाः ।
नादन्ति सस्यान्यपि वारिवाहाः परोपकाराय सतां विभूतयः ॥

लब्धं गीतपुरस्कृतम्

कस्मिंश्चिद् अधिष्ठाने उद्धतो नाम गर्दभः प्रतिवसति स्म । स सदैव रजकगृहे कर्म कृत्वा रात्रौ स्वेच्छया पर्यटत् । ततः प्रत्यूषे बन्धनभयात् स्वयमेव रजकगृहं समागच्छत् । रजकोऽपि ततस्तं बन्धनेनाऽबध्नात् । एवं रात्रौ क्षेत्राणि पर्यटतः तस्य केनचित् शृगालेन सह मैत्री संजाता । स च पीवरत्वात् वृत्तिभङ्गं कृत्वा रात्रौ शृगालसहितः कर्कटिकाक्षेत्राणि प्रविशति । इत्थं च द्वावपि तौ स्वेच्छया चिर्भटिकाभक्षणं कृत्वा प्रत्यहं प्रत्यूषे स्वस्थानं व्रजतः ।

कदाचित् स मदोद्धतो रासभः क्षेत्रस्थितः शृगालमाह—भोः । भगिनीसुत ! पश्य पश्य । अतीव निर्मला रजनी । तदहं गीतं करिष्यामि । तत्कथय कतमेन रागेण करोमि । स आह माम ! किमनेन वृथार्थप्रचलेन । यतश्चौरकर्मप्रवृत्तैः चौरैः जारैरपहारकैश्च निभृतैः स्थातव्यम् । उक्तं च—

कासी विवर्जयेच्चौर्यं निद्रालुश्च चौरिकाम् ।
जिह्वालौल्यं रुजाक्रान्तो जीवितं योऽत्र वाञ्छति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपरं च त्वदीयं गीतं न मधुरस्वरम् । शङ्खशब्दानुकारं दूरादपि श्रूयते। अत्र क्षेत्रे रक्षपुरुषाः सुप्ताः सन्ति। त उत्थाय वधं बन्धं वा करिष्यन्ति । तद् भक्षय तावदमृतमयीश्चिर्भटीः । मा त्वमन्यव्यापारपरो भव। तच्छ्रुत्वा रासभः आह -भो ! न त्वं वेत्सि गीतरसं वनाश्रयत्वात्। तेनैतद् ब्रवीषि उक्तं च--

शरज्ज्योत्स्नाहिते दूरं तमसि प्रियसन्निधौ ।
धन्यानां जायते कर्णे गीतझङ्कारजा सुधा ।

शृगाल आह--माम ! अस्त्येतत् । परं न जानासि त्वं गातुम् । केवलं रेक्षसे। तत् किं स्वार्थभ्रंशकेन गीतेन। रासभ आह -- धिङ् धिङ् मूर्ख! किमहं न जानामि गीतम् । कथं रे भगिनीसुत ! मामनभिज्ञं कृत्वा निवारयसि। शृगाल आह -- माम ! यद्येवं तदहं तावद् वृत्तेर्द्वारस्थितः क्षेत्रपमवलोकयामि। त्वं पुनः स्वेच्छया गीतमारभस्व ।

तथानुष्ठिते रासभरेभणमाकर्ण्य क्षेत्रपः क्रोधान् दन्तान् घर्षन्नधावत्। स यावद् रासभं पश्यति तावत्तं लष्टिकाप्रहारैस्ताडयित्वा भूमौ, पातयति। ततश्च सच्छिद्रोलूखले बद्ध्वा गतः, सुप्तश्च भूयः । रासभोऽपि जातिस्वभावात् गतवेदनः क्षणेनोदतिष्ठत्। यथोच्यते --

सारमेयस्य चाश्वस्य रासभस्य विशेषतः ।
मुहूर्तात् परतो न स्यात् प्रहारजनिता व्यथा ॥

ततस्तदेवोलूखलमादाय वृतीः चूर्णयित्वा पलायितुमारब्धः। अत्रान्तरे शृगालोऽपि तं दृष्ट्वा सस्मितमाह –

साधु मातुल ! गीतेन मया प्रोक्तोऽपि न स्थितः ।
अपूर्वोयं मणिर्बद्धः लब्धं गीतपुरस्कृतम् ॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शत्रवः संस्कृते सन्ति

संस्कृतं नाम दिव्यं पवित्रं च वाङ्मयम् । गङ्गाजलं पीतमात्रं यथा पावयति जनम्, तथैव संस्कृतमपि श्रुतं पठितमधीतं च पुनाति जनम्, हरति च लोकस्य पापरूपम् अज्ञानम् । जलम्, अग्निः सूर्यस्य प्रकाशश्च यथा विश्वमुपकुर्वन्ति पवित्रीकुर्वन्ति च तथैव संस्कृतमपि संशोधयति पुष्णाति संजीवयति च निखिलं विश्वस्य वाङ्मयम् ।

पुनाति पवनः स्पृष्टोऽनुप्रविष्टो हुताशनः ।
पीतं गङ्गाजलं चापि श्रुतमात्रं हि संस्कृतम् ॥

सर्वेऽपि भारतीयाः वेदमन्त्रान्, गीतापाठम्, धर्मकथाम्, उपनिषच्चर्चां च श्रुत्वा पठित्वा चात्मानं पवित्रं धन्यं च मन्यते । शैवाः शाक्ताः वैष्णवाः जैनाः वा सर्वेऽपि वयं स्वधर्मग्रन्थान् संस्कृते एव पठामः । सर्वे धर्मग्रन्थाः अस्माकं संस्कृते एव लिखिताः सन्ति । सर्वाण्यपि नः देवप्रार्थनास्तोत्राणि संस्कृते एव रचितानि वर्तन्ते । देवा अस्माकं दिव्यां स्तोत्ररूपां संस्कृतभारतीं श्रुत्वा प्रसन्नाः संजायन्ते । सर्वेऽपि भक्ताः संस्कृतेनैव वचसा स्तुवन्ति देवान् । संस्कृतव्याहृतैः स्तोत्रैः प्रीतास्ते ददयन्ति वरं भक्तान् । काम्यानां कर्मणां संकल्पमपि वयं संस्कृते एव घटित्वा प्रारभामहे कार्याणि । सर्वाण्यपि अस्माकं माङ्गलिकानि कार्याणि देवपूजाक्रियाकलापश्च संस्कृते एव वचसि सम्पादनीयो वर्तते । जन्मनः आरभ्य निधनं यावत् सर्वाण्यपि अस्माकं संस्कारकार्याणि संस्कृते एव कारयन्ति पुरोहिता अधुनापि ।

अपौरुषेया वेदा अस्माकं संस्कृते एव लिखिताः सन्ति । च पुरा भारते गणितस्य विज्ञानस्य च प्रथमारम्भाः संस्कृते एव कृता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभवन् । यथा वेदा ईश्वरप्रोक्ताः सनातनाश्च सन्ति तथैव संस्कृतमपि ईश्वरप्रोक्तं सनातनं च व्याहृतं सद्भिः । वैदिकं संस्कृतं वेदेभ्योऽपि चिरन्तनमिति वेदा एव प्रमाणम् । सदातने संस्कृते वचसि मुनयः सर्वविधानि शास्त्राणि संहिताश्च अरचयन् । तद् अस्माकं पूर्वजैः उपार्जितं पूजितं च संस्कृतम्, यस्मिन् चिरन्तनात् कालाद् विद्वांसोऽशेषान् विषयान् लिखित्वा लोकान् उपाकुर्वन् मानुषाश्चाऽधीत्य तद् भूदेवत्वमवाप्नुवन् ।

चिरन्तनात् कालात् प्रतिष्ठां लभमानं वर्तते लोकेषु संस्कृतम् सर्वेऽपि भारतीया राजानो महाराजाश्च संस्कृतमपूजयन् । तेषां सर्वाण्यपि राजकार्याणि संस्कृतेनैव वचसा सम्पन्नानि अभवन् । कवयः लेखकाश्च संस्कृते एवाऽलिखन् । व्याख्यातारश्च संस्कृते एव सिद्धान्तान् व्याख्यन् । संस्कृतद्रोहिणां यवनानामाङ्गलानां चापि काले देशेऽस्माकं राज्येषु प्रजासु च सहस्रशः संस्कृतपाठ-शाला आसन् । संस्कृतज्ञानां तदानीं गृहे गृहे पूजा अभवन् । संस्कृतस्य नाम्नापि जनाः महतीं पूजां प्राप्नुवन् ।

संस्कृतस्य नाम्नैव पूजा भवतीति लब्धावसरा धूर्त्ता ललाटे भस्म गोपीचन्दनं वाऽऽलिप्य, गले सूत्रं च परिधाय, लम्बधौतमुष्णीषं च निधाय संस्कृते क्षेत्रे प्राविशन्, अगृह्णन् च छलेन पूजाम् ।

इत्थं च तेषां धूर्त्तानां सम्प्रदायः लोके प्रावर्तत, वर्तते चेदानीमपि प्रवर्धमानः । भारतस्य महानगरेषु महाग्रामेष्वपि च प्रायः सर्वत्र सन्ति मठाः मन्दिराणि मण्डलानि पाठशालाः अन्याः संस्थाश्च तादृशां बहुरूपिणां मायाविनाम् । धूर्त्तानां महाभेरीध्वनिषु साधुस्व-भावानां सतां विदुषामपि व्याख्यानानि मन्दानि अभवन् । सज्जनाः मौनमाश्रयन् । राजानो वञ्चिता आसन्, पुरोहिता उपेक्षावृत्तयो-ऽभवन् । साधारणाः जनाश्च मयाविनां छलैः निगृहीता विजिता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्चासन्, इति प्रथम स्खलनमासीत् संस्कृतस्य संस्कृतज्ञानां च । ततश्च 'विवेकभ्रष्टानां भवति विनिपातः शतमुखः' इति न्यायेन पदे पदे विनिपातं लब्ध्वापि चिरञ्जीवितया हन्त ! अधुनापि जीवति संस्कृतम् ।

इदानीं शिक्षाविभागस्य मन्दतया धर्मनिरपेक्षस्य राज्यस्य चोपेक्षया च विद्यालयेभ्यः संस्कृतज्ञाः न जायन्ते इति प्राबल्यं वर्धते तथाविधानां धूर्त्तानां भण्डानाम् । ते साधुवेषान् विधाय धार्मिकान् धनिनः मुधैव स्तुत्वाऽञ्जसा गृह्णन्ति धनानि, मोदन्ते च विधाय संङ्गं नटविटगायकानां नटीनां च समाजेषु । संस्कृते व्याख्येयां गीतां केचिद् आङ्गलभाषायां व्याख्यन्तोऽर्थस्याऽनर्थं कुर्वतोऽज्ञान जनान् भ्रामयित्वा वञ्चयन्ति । अन्ये चाऽजानाना अपि संस्कृतस्य प्रचारच्छलेन महान्तमाडम्बरं विधाय सभापतिस्थाने तिष्ठन्तः विविधैः विधैः धनिकेभ्यः राज्येभ्यश्चापि धनानि लुण्ठन्ति भ्रामयन्ति च संस्कृतं पठितुमिच्छानपि जनान् छात्रान् वापि । परे तु संस्कृतशत्रवः संस्कृतमजानन्तोऽपि यां कां वापि संस्कृतपरीक्षां दत्वा लब्धप्रमाणपत्राः अध्यापकस्थानमधिगम्य पाठयितुमयोग्या अपि यद्वा तद्वा पाठयन्तोऽशक्ताः 'संस्कृतं कठिनं वर्तते, रूपाणि रटितव्यानि इतिछात्रान् भ्रामयन्तः उपाध्यायस्थानाद् भाषमाणाः व्याघ्रीकुर्वन्ति संस्कृतम्, प्रातारयन्ति च छात्रान् संस्कृतरहितान् शिक्षाविभागाधिकारिणः अपि । इतरे वज्रमूर्खाः संस्कृतस्य गुणान् न मनागपि स्पृशन्तः बहुशः संस्कृतं निन्दन्ति अकारणवैरिणो विफलाः अशक्ताश्च संस्कृत भिक्षवः । परे च ज्ञानलवदुर्विदग्धाः अज्ञानान्धकारगृहीतेषु प्रजाजनेषु स्वपाण्डित्यं स्थापयितुं मधुरेण छलेन संस्कृतप्रचारे विघ्नान् उपस्थापयन्तः आत्मानं सफलं मन्यते इति बहवः संस्कृते शत्रवः सन्ति ।

संस्कृते दुर्बलाः सन्ति संस्कृते सन्ति वञ्चकाः ।
अज्ञाश्च संस्कृते सन्ति संस्कृते सन्ति शत्रवः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

—-०-—

Digitized by Arya Samaj Foundation Chennai and eGangotri

वरमेको गुणी पुत्रः

आसीत् पुरा प्रयागे नगरे काचिद् विधवा ब्राह्मणी। सा अतीव निर्धना अभवत्। तस्याः मातृभक्ताः सुशीलाश्च पञ्च पुत्राः आसन्। ते सर्वेऽपि सुबुद्धयः अभवन्। ते श्रमेण मनोयोगेन च विद्याः अपठन्। नित्यं सा तान् स्वस्याः पुत्रान् विद्यालयम् अनयत्।

एकस्मिन् दिने मार्गे मिलितः कश्चित् सज्जनः ताम् अपृच्छत्। हे मातः! सुचरित्रा त्वं सदैव धनस्य अभावेन कष्टानि अनुभवसि। अहं तव साहाय्यं कर्त्तुम् इच्छामि। इमानि शतं रूप्यकाणि अहं तुभ्यं यच्छामि।

तदा साध्वी सा विनयेन अकथयत्—हे महानुभाव! अहं तथाविधा दीना नास्मि यथा भवान् मां जानाति। मम बहुमूल्यानि पञ्च रत्नानि सन्ति।

'अहो! सत्यं कथयति भवती। क्व सन्ति तानि तव रत्नानि?' इति स धनाढ्यः ताम् आश्चर्येण अपृच्छत्। तदा सा पुत्रान् प्रति संकेतं कृत्वाऽवदत्--

हे भद्रकाम! इमानि मम बहुमूल्यानि पञ्च रत्नानि सन्ति। विनीतान् तान् तस्याः पुत्रान् विलोक्य—'निःसंदेहं सुपुत्राः सर्वेभ्यः रत्नेभ्यः श्रेष्ठाः बहुमूल्याः च भवन्ति' इति स सज्जनः पुरुषः अकथयत्। कवयोऽपि वदन्ति।

वरमेको गुणी पुत्रो न च मूर्खशतान्यपि।
एकश्चन्द्रः तमो हन्ति न च तारागणोऽपि च॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूढो लम्बोदरः

अस्ति लुण्टाकपुरनाम्नि ग्रामे सुखरामदासो नाम जटी। ग्रामस्य बहुलायां वसतौ प्रायः वणिजां गृहाणि आसन्। सर्वेऽपि ग्रामजनाः जटिनो यजमानाः आसन्।

पार्श्ववर्तिषु ग्रामेषु सुदूरं व्यापारान् कुर्वन्तः सरलान् ग्रामीणान् च वञ्चयित्वा सर्वेऽपि वणिजः धनिनः समाजयन्त।

ते सुन्दराणि महाभवनानि कारयित्वा विविधान् भोगान् च भुञ्जानाः सुखेन न्यवसन्। वर्तते स्म वसतेः मध्ये ग्राममुख्यैः कारितं विष्णोः मन्दिरम्। जटी सुखरामदासः शिष्यैः समेतोऽस्मिन्नेव मन्दिरे अवात्सीत्। मन्दिरमिदं 'सुखरामस्य मठः' इति प्रसिद्धिमगच्छत्। जटिनः तस्य मौनः, मुखरः, उदरम्भरिश्चेति त्रयः शिष्याः अभवन्

सुखरामदासः रुग्णानां प्रेतबाधितानां च चिकित्सामकरोत्। दूरदूराद् ग्रामेभ्यः आगताः जनाः तेन चिकित्सामकारयन्। सरलेषु ग्रामजनेषु श्रद्धां समुत्पाद्य जटी सुखरामदासः विनैव श्रमेण कणशः कणशः विपुलां धनराशिमचिनोत्।

साधौ श्रद्धावन्तः ग्रामवास्तव्याः वारक्रमेण स्वस्वगृहाद् भोजनं दत्त्वा मठाधीशस्य सुखरामदासस्य भोजनव्यवस्थामकुर्वन्। निर्बुद्धिः मौनः मठे भगवतः पूजां समागतानां दर्शनार्थिनां स्वागतं चाकरोत्। मुखरो मन्दिरे कथां वाचयन् जनानां श्रद्धामवर्धयत्, लम्बोदरः उदरम्भरिश्च नित्यं जनानां गृहात् विविधानि स्वादूनि भोजनानि समानीय गुरोः गुरुभ्रात्रोश्चापि सेवामकरोत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकदा कस्यचिद् यजमानस्य गृहे उत्सवः आसीत् । तस्मिन् दिने उदरंभरिः यजमानाद् भिक्षायां द्वात्रिंशत् वटकानि लब्धवान् । लघूनि सुन्दराणि स्वादूनि सुगन्धीनि च वटकानि वीक्ष्य लम्बोदरस्य मुखे पानीयमायातम् । बुभुक्षितः स मठमागत्य महानसस्य कोष्ठे आस्थाय--'एतेषां वटकानां मध्याद् गुरुदेवो मह्यं स्वस्मात् अर्धं दास्यति । तर्हि किं नाहं प्रथममेव भक्षयेयं स्वकीयं भागम्' इति विचार्य स षोडश वटकानि अभक्षयत् । ततो हस्तौ मुखं च प्रक्षाल्य पुनः स तानि वटकानि अगणयत् , व्यचारयच्च—एतेषामपि वटकानामर्धम् ' अष्टौ वटकानि पुनरपि दास्यति मे गुरुदेवः' इति पुनरपि सः अष्टौ वटकानि अखादत् ।

ततः स शिष्टानि अष्ट वटकानि आनीय गुरोः पुरतः निधाय सम्मुखेऽतिष्ठत् । 'किं भोः ! किमद्य वटकाष्टकमेव लब्धं त्वया भिक्षायाम् ' इति गुरुः अपृच्छत् । 'गुरुदेव ! यजमानो द्वात्रिंशद् वटकानि अददात् , परं जिह्वालौल्यात् चतुर्विंशतिः लघुवटकानि मया भक्षितानि ' इति कुक्षिंभरिः अकथयत् । कथं भक्षितानि, इति पुनरपि गुरुरपृच्छत् । ततः स लम्बोदरः पश्यतः एव गुरोः पुरतः सर्वाणि वटकानि त्वरितेन क्रमेण मुखे क्षिप्त्वा, एवं मया भक्षितानि तानि इत्यकथयत् । गुरुः तस्य भ्रातरौ च तस्मिन् क्रुद्धा अभवन् । अन्ये चोपस्थिता जनाः तमुपाहसन् । तदा गुरुरवादीत्—

मूर्खः शिष्यो न कर्त्तव्यो गुरुणा सुखमिच्छता ।
विडम्बयति सोऽत्यन्तं यथाऽयं लम्बकोदरः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वसंस्कृतसम्मेलने पारिता प्रस्तावाः

INTERNATIONAL SANSKRIT CONFERENCE(1972)

RESOLUTION NO. 1

This International Sanskrit Conference recommends the setting up of a duly ragistered International Association of Sanskrit Studies (IASS) to function under the auspices of UNFSCO, for the pnrpose of promoting, diversifying, intensifying and coordinating Sanskrit studies in various countries of the world,

The Conference further recommends to the organisers the setting up of a Committee of sanskrit scholars from different countries to draft a constitntion for this Association and take all such necessary steps.

RESOLUTION NO. 2

This International Sanskrit Conference

–noting the urgent need for Puicker dissemination of reserch material and information concerning Sanskrit among various nations,

–recognising the necessity for proper preservation of Sanskrit manuscripts and different forms of traditional sanskrit lore, and

–considering the desirability of more extensive exchange of Sanskrit scholars amonge differnt countries

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

recommends that a suitaible machinery be created to achieve the goales indicated above and to function as a clearing house of information.

2 It further suggests that a National Sansksit Ltdrary be established in India Where scholars from other countries could also be offered facilities for residence for the purpose of stu ly.

RESOLUTION. NO 3.

This Intenrational Sanskrit Conference recommends the setting up of a suitable organisation for,

(a) publication of popular Sansksit texts and translation into verious major world languages,

(b) publication of critical editions of important Sanskrit texts in cheap paper-book editions,

(c) publication of graded Readers for learning Sanskrit through various World langauge, and,

(d) pudlication of popular books depicting various facts of Sauskrit culture in world languages,

RESOLUTION NO. 4.

One of the main reasons for convening this Conference being the unfortunate decline in classical studies and the realization of the need to preserve and promote International Cultural understanding through them, the Conference recomments that adequate steps be taken by national and state Governments to provide for a secure place for the study of sanskrit at all stages of education.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

RESOLUTION NO. 5

This International Sanskrit Conference notes that several long-trem projects of Sanskrit research have been undertaken in India and abroad, which have been languishing or stand in need of more support for their quicker completion, and

–appeals to all Govenments and International agencies and foundations to extend to them their liberal aid to enable them to be completed soon.

श्रीहरिः

बम्बई–गोग्रास-संस्था-गोशाला

गोशालेयं डोवीवल्ल्यां थानाप्रान्ते आपञ्चांशवर्षेभ्यः चलति । अत्र २५० पशूनां पालनं संवर्धनं च भवति । गोभक्ताः संस्थायाः निरीक्षणं कुर्युः दद्युश्च स्वस्य गोसेवायाः रुचेः परिचयम् । गौरस्माकं देवेषु गणिताऽस्ति । वयं गोपूजकाः स्मः ।

अत्रेमानि शास्त्रवचनान्यनुसन्धेयानि—

विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः ।
श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः ॥
गावो बन्धुर्मनुष्याणां मनुष्या बान्धवो गवाम् ।
गौश्च यस्मिन् गृहे नास्ति तद् बन्धुरहितं गृहम् ॥
गोग्रासं ये प्रयच्छन्ति शुश्रूषन्ति च गाः सदा ।
गोदुग्धं ये च सेवन्ते ते स्वर्लोकनिवासिनः ॥

Space Donated by–

Seth Haridas Devidas
M/s. Madhavaji Thakarcy, Bombay-1

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भुञ्जन्ति धूर्ताः कृपणस्य वित्तम्

[१]

क्षेत्रेषु वाटीषु वनेषु नित्यं लतासु वृक्षेषु महौषधीषु ।
मधूनि पुष्पेषु समाहरन्तीं विलोकयामो मधुमक्षिके त्वाम् ॥

[२]

प्रातश्च सायं दिवसस्य मध्ये अनातपे वापि परातपे वा ।
सर्वेषु कालेषु प्रयत्नशीलां विलोकयामो मधुमक्षिके त्वाम् ॥

[३]

सदैव कार्येषु समाकुला त्वं करोषि यत्नेन सदा मधूनि ।
पुष्पेभ्य आनीय चषालकेषु विलोकयामो मधुमक्षिके त्वाम् ॥

[४]

पूर्वाह्ण –मध्याह्न पराह्णकाले दिनेषु मासेषु च वत्सरेषु ।
ग्रीष्मे च वर्षासु हिमे वसन्ते विलोकयामो मधुमक्षिके त्वाम् ॥

[५]

आम्रेषु नीपेषु च केतकेषु वन्यासु वल्लीष्वतिमुक्तिकासु ।
मधूनि पुष्पेषु समाहरन्तीं विलोकयामो मधुमक्षिके त्वाम् ॥

[६]

जपासु जातीषु च मालतीषु मन्दार–पुन्नाग–शिरीषकेषु ।
मधुनि पुष्पेषु समाहरन्तीं विलोकयामो मधुमक्षिके त्वाम् ॥

[७]

निद्रां परित्यज्य यदा प्रबुद्धा गीतानि गायन्ति खगाः प्रसन्नाः
उषासु तत्रापि परिभ्रमन्तीं विलोकयामो मधुमक्षिके त्वाम् ॥

[८]

गावः प्रचाराय न यान्ति यावत् पुष्पाणि यावन्न दलन्ति प्रातः ।
त्वमीक्षमाणा लभसे मधूनि विलोकयामो मधुमक्षिके त्वाम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[७]

कार्ये सुदक्षासि सुकर्मठाऽसि मन्दस्य लोकस्य निदर्शनाऽसि ।
मधूनि चेतुं विपिने चरन्तीं विलोकयामो मधुमक्षिके त्वाम् ।

[८]

जानासि योग्यीकरणे प्रयुक्तीस्त्वं वेत्सि नम्रीकरणे समृद्धीः ।
मधूनि चेतुं विपिने चरन्तीं विलोकयामो मधुमक्षिके त्वाम् ॥

[९]

परागलामाय न यासि कं कं वृक्षं लतां वापि न यासि कां काम् ।
हठात्पिबन्तीं मधु कुड्मलेषु विलोकयामो मधुमक्षिके त्वाम् ॥

[१०]

करीरकुञ्जेषू सकण्टकेषु निरगन्धपुष्पेषु च किंशुकेषु ।
निम्बेषु कोलेषु च बर्बरेषु विलोकयामो मधुमक्षिके त्वाम् ॥

[११]

फलन्ति यत्ना इह तावकीना आयान्ति विघ्ना मधुहारकेभ्यः ।
भाग्यस्य दोषो न तवास्ति दोषः पुण्यैकलभ्यानि फलानि वा स्युः

[१२]

मधूनि ते स्वान्यसुखार्जितानि त्रातानि यत्नेन चषालकेषु ।
हा हन्त लुण्ठन्ति वनेषु भिल्लाः भुञ्जन्ति धूर्ताः कृपणस्य वित्तम्॥

अनुग्राहकेषु ग्राहकेषु

येषां भवतां शुल्कं शिष्टं वर्तते तैः शीघ्रं प्रहेयम्, इति प्रार्थयते--

--प्रबन्धसंपादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनयः सम्पदां हेतुः

यो जनः शक्तो नमति, स नम्रः उच्यते । सभ्यः शिष्टः विनीतः सुशीलः संस्कृतः इत्यादयः शब्दाः नम्रस्य पर्यायवाचकाः सन्ति । नम्रस्य भावो नम्रता । सैव विनयपदवाचकतां भजते ।

प्रकृत्या जायन्ते लोकेऽस्मिन् गुणा दुर्गुणाश्च सर्वेषां जन्मवताम् । तत्र गुणाश्च शिक्षणेन स्वकीयेनाभ्यासेन सज्जनानां सङ्गेन वा वर्धन्ते । स्वभावेन गुणिनस्तु विरला एव भवन्ति विनीततमाः पुण्यवन्तः महात्मानः । यथा हि—

मनसि वचसि काये पुण्यपीयूषपूर्णाः
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून् पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥

भुवनेऽस्मिन् प्रायेण उच्चकुलोत्पन्ना जनाः, राजकुमाराश्च स्वभावेन विनयसम्पन्ना दृष्टिगोचरतां समायान्ति । 'विनयः राजपुत्रेभ्यः' इति लोकोक्तेः । इह स्वाभाविको विनयः सर्वस्य सुकरो नास्ति इति हेतोः विद्यानां कलानां गुणानां च शिक्षणमभ्यासश्च विद्यालयेषु दीयते । सर्वेऽपि पितरः स्वस्वपुत्रान् पुत्रीश्च पाठशालां गमयन्ति, गुरवश्च तत्र तत्र तान् तान् तास्ता विद्याः पाठयन्ति । कृतविद्यानां कलावतां लब्धगुणानां च मनःसु विनयो लब्धांकुरः संजायते ।

विनयेनाऽन्येऽपि गुणाः शोभन्ते इति विनयस्य प्राथमिकी आवश्यकताऽत्र सर्वस्यापि नुः प्रजायते, अत एव सर्वोऽपि शैशवादेव कठिनं श्रमं कृत्वा विद्यानामभ्यासं सम्पाद्य विनयसम्पन्नः सन् पात्रतां सुखानां च भाजनं सम्पद्यते । यथोच्यते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद्धर्मस्ततः सुखम् ॥
विद्या भूषा कुरूपाणां वीराणामविकत्थना ।
तापसानां क्षमा भूषा विनयः सर्वभूषणम् ॥

यथेह केचन धनिनो विद्यार्थिनो गुरुभ्यो धनं दत्वा विद्याः कलाश्चाधिगच्छन्ति, न तथा विनयः कुतोऽपि क्रेतुं शक्यते तैः । स तु स्वयंकृतेनाभ्यासेन स्वयं भुक्तेन भोजनेव लब्धा तृप्तिरिव गुणाधायको भवति।

परेषां तु विद्यादीनां गुणानां कार्याणां वा सिद्धये व्ययस्यापेक्षा भवति, विनस्य प्राप्तये तु न कुत्रापि धनव्ययस्यास्ति प्रयोजनम्।

विनयः सर्वेषामाकर्षको गुणः । विनीतो जनः सर्वस्य प्रियो जायते। स्नेहमिश्रितेन विनयेन जाङ्गलाः पशवोऽपि प्रियंकराः संप्रवर्तन्ते। बहुशः कृतात् उपकारादपि विशिष्यते खलु विनयः। शुद्धात् स्नेहमयात् हृदयात् जातानि, मृदुतया च संसृष्टानि विनयवचनानि कं न जयन्ति ! शत्रवोऽपि विनीतेन न्याय्येन व्यवहारेण च मित्राणि संजायन्ते। विनयो नाम वशक्रिया जगताम् ।

विनयः खलु आवश्यको गुणो गणतन्त्रस्य राज्येऽधुनातने लोकहितानि कार्याणि कर्त्तुमिच्छताम् । विनयेन गुणेन सद्भिः जनैः दृढः परिचयः संवर्धते। परिचितेषु विश्वासः उद्भवति। विश्वस्तेषु सर्वेऽधिकारः निधीयन्ते इति विनयः सर्वेषामादराणां निदानम् ।

एक एव विनयः द्वेषदूषितहृदयानां जनानां मनःसंशोधकं पीयूषमाधायकमौषधम् । विनीतस्य जनस्य हृदयं न कदापि क्रोधस्य पात्रताम् भजते, इति विनयः सर्वानपि दुर्गुणान् जेतुम्, गुणान् चाधिगन्तुं च शक्नोति।

तिष्ठतां तपसि पुण्यमासृजन् सम्पदोऽनुगुणयन् सुखैषिणाम् ।
योगिनां परिणमन् विमुक्तये केन नास्तु विनयः सतां प्रियः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनीते भृत्ये स्वामी तुष्यति। विनीते शिष्ये गुरुः स्वविद्याः निदधाति। विनीते पुत्रे पिता प्रीणाति। विनीतायां भार्यायां पतिस्तुष्यति, विनीते स्निग्धहृदये भक्ते सर्वात्मा भगवानपि प्रसीदतीति विनयोऽशेषाणां कल्याणानां निदानम्। अतः सर्वैरेवोपायैः विनयः शिक्षणीयोऽस्माभिः। इदमत्रोच्यते—

विनयः कारणं प्रीते विनयो गुणभूषणम्।
विनयः संपदां हेतुः विनयो यशकृन्नृणाम्॥

—०—

किं तपः किं तस्य महत्त्वम्

—०—

गीतायां भगवान् श्रीकृष्णः —— सात्विकं राजसं तामसं चेति तपसः त्रिविधात्वं प्रतिपादयन्, तत्रैव —— शारीरं वाङ्मयं मानसं चेति त्रिभिः प्रकारैः तदाचरणीयमित्याह—

शारीरम्

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥

वाङ्मयम्

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥

मानसम्

मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते॥

मनुरपि चात्र बहूनामशुभकर्मणां प्रायश्चित्तं तपः प्रतिपादयन् मनोवाङ्मूर्तिभिः नित्यं शुभं कर्म समाचरेत्, इत्युपदिशन्, तस्य स्वरूपं माहात्म्यं च वर्णयति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तपोमूलमिदं सर्वं दैवमानुषकं सुखम् ।
तपो मध्यं बुधैः प्रोक्तं तपोऽन्तं वेददर्शिभिः ॥
ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम् ।
वैश्यस्य तु तपो वार्ता तपः शूद्रस्य सेवनम् ॥
ऋषभः संयतात्मानः फलमूलानिलाशनाः ।
तपसैव प्रपश्यन्ति त्रैलोक्यं सचराचरम् ॥
औषधान्यगदो विद्या दैवी च त्रिविधा स्थितिः ।
तपसैव प्रसिद्ध्यन्ति तपस्तेषां हि साधनम् ॥
यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्चदुष्करम् ।
सर्वं तु तपसा साध्यं तपो हि दुरतिक्रमम् ॥
महापातकिनश्चैव शेषाश्च कार्यकारिणाः ।
तपसैव सुतप्तेन मुच्यन्ते किल्मिषात्ततः ॥
कीटाश्चाहिपतङ्गाश्च पशवश्च वयांसि च ।
स्थावराणि च भूतानि दिवं यान्ति तपोबलात् ॥
यत् किंचिदेनः कुर्वन्ति मनोवाङ्मूर्तिभिर्जनाः ।
तत्सर्वं निर्दहन्त्याशु तपसैव तपोधनाः ॥
तपसैव विशुद्धस्य ब्राह्मणस्य दिवौकसः ।
इज्याश्च प्रतिगृह्णन्ति कामान् संवर्धयन्ति च ॥
प्रजापतिरिदं शास्त्रं तपसैवासृजत्प्रभुः ।
तथैव वेदान् ऋषयः तपसा प्रतिपेदिरे ॥
इत्येतत्तपसो देवा महाभाग्यं प्रचक्षते ।
सर्वस्यास्य प्रपश्यन्तस्तपसः पुण्यमुत्तमम् ॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिने दिने नवं नवम्

(१)

स्वभावचारु संस्कृतं नवीनबोधशोधकम् ।
अपूर्ववृत्तशोभितं पठामि बालसंस्कृतम् ॥

(२)

सुबुद्धशिष्यशंसितं विचक्षणैः प्रशंसितम् ।
प्रशस्यमीप्सितं सदा पठामि बालसंस्कृतम् ॥

(३)

समाहृतं समुद्रितं सुलेखजातशोभितम् ।
अपूर्वशिष्टकल्पनं पठामि बालसंस्कृतम् ॥

(४)

सदैव देवभारती प्रचारकं जनप्रियम् ।
समृद्धसंस्कृताक्षरं पठामि बालसंस्कृतम् ॥

(५)

अनल्पसौम्यवैभवं नितान्त-नूत्न-सत्कथम् ।
नवीनयुक्तिपूरितं पठामि बालसंस्कृतम् ॥

(६)

विशेषशेमुषीभरं नवप्रकल्पनायुतम् ।
प्रवीणभावसम्भृतं पठामि बालसंस्कृतम् ॥

(७)

उदात्तयोजनान्वितं प्रशस्तकाव्यशोभितम् ।
नवप्रहेलिकायुतं पठामि बालसंस्कृतम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(८)

नवीनवृत्तशोभितं सदुक्तिभिः सुभासितैः ।
विचित्रचित्रमण्डितं पठामि बालसंस्कृतम् ॥

(९)

कथाभिरद्भुतं प्रियं निबन्धबन्ध-भूषितम् ।
नवप्रवृत्तिसूचकं पठामि बालसंस्कृतम् ॥

(१०)

स्वधर्मबुद्धिपोषकं स्वरूपसंप्रबोधनम् ।
विशिष्टभावपूरितं पठामि बालसंस्कृतम् ॥

(११)

नितान्तमूलपद्धति — विशिष्टशिष्टसंस्कृतम् ।
समस्तदेशश्रुतं पठामि बालसंस्कृतम् ॥

(१२)

नवीनशिष्यवल्लभं नितान्तमूलहेतुकम् ।
प्रवृद्धदेवभाषितं पठामि बालसंस्कृतम् ॥

(१३)

पुरे जनैः प्रशंसितं गृहे वधूभिरर्चितम् ।
मनीषिभिः समादृतं पठामि बालसंस्कृतम् ॥

(१४)

पदे पदे सकौतुकं प्रशस्यवस्तुयोजकम् ।
दिने दिने नवं नवं पठामि बालसंस्कृतम् ॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्व- संस्कृत- सम्मेलनम्

लेखकौ—कपिलदेवचक्रदेवौ

२६.३१ मार्च १९७२ नव-दिल्ली-भारतम्

भारतस्य राष्ट्रभाषा

अस्माकं रा॰्ण राष्ट्रध्वजराष्ट्रगीतराष्ट्रपुष्पादीनि बहूनि राष्ट्रवस्तूनि निर्णीता॰न किन्तु अद्यावधि राष्ट्रभाषा न निर्धारिता। संविधानेन यद् वस्तुनिर्णीतम् अ॰ि तद् केवलं केन्द्र-शासनभाषा इत्येव, यस्मिन् स्थाने परकीया आंग्लीभाषाऽपि १९६८ वमवर्षस्य प्रथम अधिनियमेन पुनः प्रतिष्ठापिता विद्यते।

अनेन स्पष्टं भवति यत् केन्द्रशासनभाषा एकं वस्तु राष्ट्र-भाषा तु अन्यद्। केन्द्रशासनभाषा काले काले राज्यशासन कर्तृणाम् अहंग॰ानुसारम् परिवर्तनशीला:, राष्ट्रभाषा तु अविचला शाश्वती, यतः कस्यापि राष्ट्रस्य राष्ट्रभाषा सा एव या तद् राष्ट्रस्य संस्कृतिं परंपरां, जीवनस्य तत्वज्ञानम्, ज्ञानभण्डारं च अधिकात् अधिकप्रमाणेन धारयति, या च तद् राष्ट्रस्य प्राय सर्वैरपि, पठित अपठित जनैः आद्रियते। अतः निःशकं कथ्यते यद् अस्माकं भारत-राष्ट्रस्य राष्ट्रभाषा अनादिकालाद् आरभ्य भारती गैर्वाणी-संस्कृतभाषा ए॰ । इयमेव भाषा बृहत्तमभारतस्य अर्थात नेपाल-भूतान-सिक्कीम-ब्रह्मदेश-बांगलादेश-लंका-पाकिस्तान-काबुल-गंधार-आदिनवनिर्मितराष्ट्राणि, भारतस्य विविधप्रदेशान् च एकसूत्रेण बध्नाति, एतेषाम् विविधाः भाषाः च पुष्णाति।

इयम् वस्तुस्थितिः अस्माभिर्गतेषु बहुषु शतकेषु अस्माकम् पतनकारणात् पारतन्त्र्य कारणात् च अद्यपर्यन्तम् प्रायः विस्मृता, उपेक्षिता वा, आसीत्। किन्तु अधुना अस्मिन् प्रथम-विश्व-संस्कृत-सम्मेलने समागतैः प्रायः शतराष्ट्राणाम् संस्कृतभाषा-प्रवीणैः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिनिधिभिः, सुन्दरतया सुस्पष्टतया च "गुरोस्तु मौनम् व्याख्यानम् इति। वचनानुसारम् व्याख्यातम् अस्ति, यद् भारतस्य राष्ट्रभाषा संस्कृतभाषा एव, यतः अस्मिन् अखिले जगति भारतस्य गौरवम् संस्कृतभाषया एव। न कस्मादपि अन्यस्मात् कारणात्।

इदम् सर्वम् सुविचार्य, अत्र सम्मिलिताः वयं सर्वेऽपि प्रतिनिधयः लोकसभाम्, भारतसर्वकारम् मा. वराहगिरि वेंकटगिरिं राष्ट्राध्यक्षम्, याह याहुर-मार्दिनीम् प्रधानमंत्रिणीम् इन्दिरादेवीम् च प्रार्थयामहे यत् शीघ्रातिशीघ्रम् "संस्कृत भाषा भारतस्य राष्ट्रभाषा" उद्घोषिता भवतु।

आंग्ल-शासन-काले संस्कृतभाषा 'द्वितीयभाषा इति' स्थाने पाठ्यते स्म। स्वराज्यलाभानन्तरं तु सा अधः चतुर्थस्थाने पातिता! त्रिभाषासूत्रे चतुर्थस्थानस्य अविद्यमानत्वात् सा प्रायः, शिक्षणक्रमात् पूर्णतया निष्कासिता विद्यते। परम्, "संस्कृतम् निजम् 'सुयोग्यं स्थानम् अवश्यमेव लभताम्" इति सर्वे कथयन्ति एव। राष्ट्राध्यक्षैः डा. वराहगिरिव्यंकटगिरिभिः अपि अस्य सम्मेलनस्य स्वीये उद्घाटन भाषणे तथैव उद्घोषितम्। तत् सुयोग्यं स्थानम् राष्ट्रभाषापदम् विहाय न अन्यत्। संस्कृतभाषायै तत् उच्चैस्तमं गौरवास्पदं स्थानम्, लोकसभा अधिनियमेन एव देयम् इति एतेषां सर्वेषाम् अपरिहार्यं कर्त्तव्यम्।

अन्यत् च। 'त्रिभाषासूत्रम्' तथा परिवर्तनीयं यथा तस्मिन् सूत्रे संस्कृतभाषा इति स्थाने समस्ते भारते वर्षे शालासु अध्यापिता भवतु, यतः सा भाषा एव राष्ट्रीय एकात्मतायाः संपादनार्थं प्रबलतमां शक्तिं धारयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीरामदासस्य साधुता

एकदा शिष्यैः सह तीर्थेषु विचरन् समर्थः श्रीरामदासः छत्रपतेः शिवाजीराजस्य दर्शनं कर्तुमैच्छत् । स वन्येन मार्गेण सिंहदुर्गं प्रातिष्ठत् । मार्गे विविधैः सस्यैः शोभितानि क्षेत्राणि समागतानि । तत्र ते बहूनि इक्षुक्षेत्राणि अपश्यन् । शिष्याः क्षुधिता आसन् । तैः इक्षुकाण्डानि भग्नानि चूषितानि च बहूनि । एतस्मिन्नन्तरे क्षेत्रपतिः समागच्छत् । स दण्डमादाय साधून् हन्तुमधावत् । तं वीक्ष्य शिष्याः दूरमपासरन् । गुरुः श्रीरामदासः एव एककः तत्र वृक्षस्य छायायां मालां जपन् आसीत् । तं दृष्ट्वा स क्षेत्रपः--' अहो ! अनेनैव कृतकसाधुना मम इक्षवः भग्ना' इति अतर्कयत् । स छत्रपतेः गुरोः महात्मनः श्रीरामदासस्य लगुडैः मुष्टिभिश्च परमां पूजामकरोत् । सुतरां क्षमाशीलः साधुः श्रीरामदासः सर्वं तत् प्रहारजातं मौनभावेन सेहे । प्रहृत्य प्रहृत्य श्रान्तः क्षेत्रपतिः स्वगृहमगच्छत् ।

तत उत्थाय रामदासः भूपतेः शिवराजस्य सभाभवनमविशत् । राजा च समागस्य प्रत्युत्थानासनादिभिः सत्कृतिं विधाय गुरोः गन्धमाल्यादिभिः पूजामाकल्पयत । ततो नृपालः समर्थस्य गुरोः पृष्ठे प्रहारचिह्नानि वीक्ष्य तत्कारणमपृच्छत् । तावत् समागताः मुनेः शिष्याः सर्वं वृत्तान्तमकथयन् । ततः क्रुद्धो नृपालः तं क्षेत्रपतिं राजभृत्यैः समानीय 'किमस्य दण्डो विधेयः' इति गुरोः आदेशं प्रत्यैक्षत ।

समर्थः श्रीरामदासस्तु—' हे राजन् ! अस्य इक्षवः अस्माभिः भग्नाः इति अस्मै शुल्कं वर्तते देयम् । नास्य दण्डविधिः कर्त्तव्या । देये च शुल्के नातः परमस्मात् रसालक्षुपतेः क्षेत्रकरमादेयं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवता, इत्युक्त्वा श्रीरामदासः तस्मात् ग्राम्यात् इक्षुत्रोटनापराधस्य क्षमां भिक्षते स्म। शिवराजोऽपि तस्य कृषाणस्य भाग्यं स्तुवन् निःशुल्कं क्षेत्रं तस्मै विधाय गुरोः वचनमवितथमकरोत्। तत्र कविरिदं पद्यमघटत्—

साधोः प्रकोपितस्यापि मनो नायाति विक्रियाम्।
नहि तापयितुं शक्यं सागराम्भस्तृणोल्कया॥

प्रहेलिकाः

(१)

चक्रे मदीयौ चरणौ दृढौ तौ
स्कन्धौ विशालौ सुपरवृढौ च।
तुन्दं गभीरं न करौ मम स्तः
वोढाऽस्मि भारस्य वदन्तु कोऽहम्॥

(२)

कैलासश्रृङ्गेषु वसामि दूरं
विश्वस्य संहारकरोऽस्मि नित्यम्।
वर्णेन मध्येन विना शरोऽस्मि
नाम्ना स कोऽहं कथयन्तु सन्तः॥

(३)

आद्येन वर्णेन विना गरोऽस्मि
गर्गोऽस्मि चान्त्येन विनैव तेन।
गृहेषु पानीयभरो न दासः
वर्णैस्त्रिभिः कोऽस्मि वदन्तु धीराः॥

१. शकटः २. शङ्करः ३. गर्गरः —घटः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अजरामरसाहित्यं दत्ते संस्कृतवाङ्मयम्

सुदूरदेशेभ्यो विदेशेभ्यः समागतानाम्, विभिन्नेभ्यो भारतीय प्रान्तेभ्यश्च समुपेतानां संस्कृतविदुषां व्यक्तित्वभिः विशालं केन्द्रीय विज्ञानभवनस्य सभामण्डपं परिपूर्णं वर्तते ।

अद्य १९७२ ख्रिष्टाब्दीय-मार्चस्य २६ तमे दिनाङ्के भारतस्य माननीयो राष्ट्रपतिः श्रीवाराहवेङ्कटगिरिः महानुभावः प्रथमस्य अन्ताराष्ट्रियसंस्कृतसम्मेलनस्यास्य समुद्घाटनमकरोत् ।

भाषासु सर्वप्रथमायाः प्रथममन्ता राष्ट्रीयसम्मेलनमिदं विश्वस्य सर्वप्रथमग्रन्थस्य ऋग्वेदस्य ऋग्भिः संस्कृतमयेन राष्ट्रगीतेन च प्रारब्ध-मासीत् । उपसमितेः अध्यक्षः डा. श्रीराघवनमहानुभावः संस्कृते एव भाषणमकरोत् । उपसमितेः सचिवः डा. श्रीरामकरणशर्माऽपि संस्कृत-भाषायामेव सर्वाः कार्यक्रमघोषणा अश्रावयत् । भारतीयानां संस्कृत विदुषां भाषाणानि संस्कृते एवाऽभवन् । वैदेशिकैः कृतानां संस्कृत-वाङ्मयस्य प्रशंसावाचामनुवादः संस्कृतेनैव वचसा प्रकाशमवाप्नोत्

सर्वविधसाहित्यसम्पन्नस्य संस्कृतवाङ्मयस्य सर्वस्मिन् जगति पूर्णः प्रचारः आवश्यकः । विश्वस्य भाषा संस्कृतं तद् वाङ्मयं च विश्वस्यैकता-मुत्पाद्य दृढयति । संस्कृतमद्यापि वैदेशिकानामपि विदुषां वाग्व्यवहारस्य विचाराणामादानप्रदानस्य च महत्वपूर्णं माध्यमम् । अधुनाऽपि भारते नगरे नगरे महानगरेषु चाऽसंख्येयाः संस्कृतपाठशालाः सन्ति । बहुत्र गृहेपि गुरवश्छात्रान् पाठयन्ति संस्कृत शास्त्राणि । माध्यमिकशालासु महाविद्याल-यषु चापि सर्वत्र पाठ्यमाना संस्कृतभाषा सुतरां जीवति, जीवयति चान्या स्वदुहितॄः । अनवाऽपि संस्कृतभाषा नित्यं नवनवान् विचारान् ज्ञानानि च ददाति परिशीलिता इति विद्वांसो वदन्ति । अद्यापि भारते संस्कृतस्याधी-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिनो विद्वांसः कत्रयश्च सन्ति। संस्कृतस्य व्याकरणं हि विश्वस्य भाषाणां निर्माणकरणे निमित्तम्। विदेशेष्वपि संस्कृतस्य महान् आदरो वर्तते। यतस्तद् अनुपमं साहित्यमददाल् लोकेभ्यः ददाति, दास्येति, च। संस्कृतं साहित्यं पूर्वपश्चिमोरैक्यं सम्पादयति पुष्णाति च तत्। भारतीयः सर्वकारः संस्कृतस्य प्रचारं कांक्षते स्वीकरोति च संस्कृताध्ययनस्य महत्वम्। इतीत्थं भूयोभूयः संस्कृतं प्रशंसानः माननीयः राष्ट्रपतिः श्रीवाराहवेंकटगिरिः प्रावोचत्।

केन्द्रीयप्रोद्धयनमन्त्री डाः श्रीकर्णसिंहोऽपि संस्कृतोद्धरण प्रायं संस्कृतसाहित्यप्रंशसात्मकं व्याख्यानमकरोत्।

संस्कृतं सर्वलोकेभ्यो दत्ते नित्यंनवं नवम्।
साहित्यमत एतस्य प्रचारः सर्वसम्मतः॥
एकतां सर्वलोकस्य संस्कृतं कुरुते दृढम्।
अजरामरसाहित्यं दत्ते संस्कृतवाङ्मयम्॥

PHONE: 55, V.V.NAGAR GRAM: TUFEX V.V.NAGAR

With best compliments from

SHREE VALLABH GLASS WORKS LTD

MANUFACTURERS OF TUFEX TOUGHENED & LAMINATED SAFETY GLASSES SHEET,
WIRED & FIGURED GLASS

Regd Office:
Anand-Sojitra Road, Vallbh Vidyanagar

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Regd. No. MH 321 Balsanskritam APRIL 1972

अस्माकं प्रकाशनानि

		रु. पैसे
संस्कृतव्याहारः	भागाः १-५	०.७५
सप्त विभक्तयः		०.७५
पञ्च सन्धयः		०.७५
संस्कृतप्रवेशिका	भागाः १-३	०.७५
बालनीतिकथाः	भागाः १-८	०.६२
संस्कृतसोपानम्	भागाः १-३	१.२५
प्रहेलिकाशतकम्		०.५
संभाषा	भागाः १-५	०.६२
संभाषा English	,, ,,	०.६२
लौकिकन्यायरत्नमञ्जूषा		१.२५
संस्कृतप्रबन्धचन्द्रिका	भागाः १-३	१.२५
सुन्दरं संस्कृतम्	,, ,,	०.७५
कुमारसंभवम्	[संक्षिप्तगद्यम्]	०.७५
रघुवंशम्	,,	०.७५
भारतीयमहापुरुषाः		१.२५
संस्कृतवर्णमाला		१.८०
चाणक्यनीतिः		१.२५
चाणक्यसूत्राणि		०.७५
बालरामायणम्		०.७५
साधुसुभाषितम्		०.७५
लघुनिबन्धावली		१.००
समासाः		०-५०
कृदन्ताः		०.५०
शालेयसुभाषितानि		०.६२
कादम्बरी-कथा	[संक्षिप्तगद्यम्]	०.६२

✦ बालसंस्कृतकार्यालयः ✦

लालबहादुरशास्त्री मार्ग, घाटकोपर, बम्बई ८६

वैद्य-रामस्वरूपशास्त्रिणा, भारतीयमुद्रणालये घाटकोपरे मुम्बापुर्यां प्रकाशितम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्षः २२

बालसंस्कृतम्

अङ्कः १२

सम्पादकः - वैद्य-रामस्वरूपशास्त्री आयुर्वेदाचार्यः

वार्षिकं शुल्कं सप्त रूप्यकम्

बालसंस्कृतकार्यालयः लालबहादुरशास्त्री मार्ग, घाटकोपर बम्बई ८६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तुलसी-मानस प्रकाशन

जीवनोपयोगी साहित्य

१	पीस आफ माइण्ड	रु. ३	२	ज्ञानसाधना	रु. २
३	संसार का सार	३	४	वेदान्त का सरल बोध	१
५	विज्ञान से ज्ञान	१	६	वेदान्त नवनीत	१.५०
७	मुमुक्षु	५	८	आध्यात्मिक पिक्टोरियल	२
९	मन की शान्ति	४	१०	मनन (मासिक) वार्षिक	४

प्राप्तिस्थानम् गुप्ता मिल्स् स्टेट, [illegible] रोड, बम्बई-१०

आप का सुपरिचित —

देशी औषधियों का महान् उत्पादक—

श्रीवैद्यनाथ आयुर्वेद भवन प्रा. लि.

कलकत्ता, पटना, झांसी, नागपुर, वाराणसी

प्रातः सायं स्वाध्यायः

वैद्य-रामस्वरूपस्य किरणः सेवाकत्वे बालसंस्कृतस्य कार्यालये, [illegible] मार्गे [illegible] घाट [illegible] सायं प्रातश्च ७ वादनतः आरभ्य ८ [illegible] । छात्रैः प्र.शः प्राप्तव्यः ।

वैद्यः—रामस्वरूपशास्त्री

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

—०—

आहो ! संस्कृते रुचिमन्तो भवन्तः ।

आङ्गलं शासनं गतम् । आङ्गला अपि निःशेषं पारेसमुद्रं स्वं देशमगच्छन् । तथापि राजनीतिनिपुणास्ते 'गौराङ्गीं कामिनीं कामपि विषकन्यां निरमाय स्वसभ्यताम्, स्वैरिणीं स्वभाषाम्, नटविटगायकाचारं स्वाचारं चात्रैवामुञ्चन् ।

सोऽयं पराजितानां गौराङ्गानां स्वकीयः परिकरः परमोदारचरितानां अस्माकं भारतीयराष्ट्रस्य प्रथमसचिवानां श्रीनेरूहमहाभागानांमुदारां राजनीतिं पराजित्य विबाधतेऽधुना देशम् । सैव गौराङ्गी नीतिः भारतीयमुसलमानान् विभिद्य पाकिस्तानं कारितवतीत्यपि न विस्मरणीयमस्माभिः ।

सैषा बालकविनाशिनी युवप्रणाशिनी च विषकन्या प्रथमं शिक्षाक्षेत्रमाविशत् नटविटगायकैः स्वपरिकरैः सार्धम्, प्राणाशयच्चोच्छिद्य सर्वं शिक्षाक्षेत्रम् । इदानीं पठितः कुपठितो वाऽपि सर्वोऽपि कर्तव्यविमुखः सन् नवीनंमन्यः कोटं बूटं पतलूनं च परिधाय, चलचित्रगीतानि गायन्, होटलेषु सर्वोच्छिष्टं स्वदमानो युवा विनष्टबुद्धि र्भ्रमत्यर्थं कामं च चिन्तयन्, लुम्पयन् स्वभविष्यन् । देशस्य कन्यकावर्गो मातृवर्गश्चापि गौराङ्गीमनुकरोति विस्मृत्य स्वात्मानं स्वसंस्कृतिं चापि भारतीयाम् । इदान्तनी नारी हठात् स्वसंस्कृतिं परित्यज्य नग्ना प्रदर्शयति समाजे स्वात्मानम् ।

सोऽयमपायः प्रणोदयत्युपायम् । उपायश्च शिक्षायां परिवर्तनम्, संस्कृतस्य शिक्षामाध्यमीकरणम्, सर्वस्मिन् देशे नागरीलिपीकरणम्, कृषिक्षेत्रविवर्धनम्, गोपालनं च ।

इदानीं सन्निधिं प्रयाति पुनर्विश्वम् । सत्यां च सन्निधौ सर्वविश्वसाहित्यसम्पन्नं संस्कृतम्, सर्वमानवोचितगुणसम्पन्ना भारतीया संस्कृतिश्च सर्वस्य रुचये भविष्यतीति निश्चप्रचम् ।

अयं तावत्समयः भारतीयसर्वकारस्य संस्कृतप्रचाराय । सरलासरलं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तते संस्कृतम्। वयं षड्भिः मासैः शिक्षयामः संस्कृतम् । दापयामश्चछात्रान् वाराणसेयविश्वविद्यालयस्य प्रथमां परीक्षाम् । तां चास्माकं संक्षिप्तां नवीनां पाणिनीयव्याकरणपद्धतिं संपरीक्ष्य भारतीयशिक्षाविभागो यतेत प्राशिक्षितैः स्वकीयैरध्यापकैः संस्कृतप्रचारार्थमिति संदिशति–

वैद्यः–रामस्वरूपशास्त्री

WITH BEST COMPLIMENTS :

THE INDIA SUGARS REFINERIES LTD

Registered Office & Fectory :
HOSPET (Bellary Dist.) Mysore state.

PHONE: 330
HOSPET

GRAMS: SUGARS
HOSPET

Bombay office :
Seksaria chambers, 139. Medows street
Fort Bomday-1

PHONE: 251475.256959
BOMBAY

GRAMS:"SAFEDCHINE
BOMBAY

Manufacturers of :
CRYSTAL SUGAR: I.S.S. GRADES 30-C.30-D&30-E

PAMPASAR DISTILLERY

(A Division of India Sugars & Refineries Ltd.)
RECTIFIED AND DENATURED SPIRIT OF
96.5 PER GENT STRENGTH
INDIAN MADE FOREIN LIQUORS

BLACK PANTHER RUM

THREE SPEARS WHISKY
CLUB ACE BRANDY
ROYAL JEWELS DRY GIN

SANDOWNER WHISRY
PARIS BRANDY
PINK PANTHER GIN

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

दिल्ली-शिक्षा-निदेशालयेन राजस्थान-शिक्षा-विभागेन च मान्यता-प्राप्तम्

सरस्वती श्रुतिमहती महीयताम्

बालसंस्कृतम्

पुरे ग्रामे गृहे कुट्यां बाले वृद्धे युवस्वपि।
संस्कृतस्य प्रचाराय प्रभूयाद् बालसंस्कृतम्॥

वर्षम् २२] सम्वत् २०२८ वि. पौषे दिसम्बरं १९७१ खि. [अङ्कः १२

भगवान् पातु वो विश्वरूपः

ब्रह्मा दक्षः कुबेरो यमवरुणमरुद्वह्निचन्द्रेन्द्ररुद्राः
शैला नद्यः समुद्रा ग्रहगणमनुजा दैत्यगन्धर्वनागाः।
द्वीपानक्षत्रताराः रविवसुमुनयो व्योम भूरश्विनौ च
संलीना यस्य सर्वे वपुषि स भगवान् पातु वो विश्वरूपः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतं सर्वभेषजम्

संस्कृतम्, इति श्रुतिमधुरः पवित्रो ज्ञानविज्ञानमयश्च ध्वनिः। संस्कृतज्ञः इति पूज्यो जनः, संस्कृतपण्डितः इति च सम्माननीयः पुरुष इति भारतीयानामस्माकं साधारणी धारणा वर्तते। भवतु नाम कोऽपि बहूनां विषयाणां वेत्ता, तथापि यावत् स संस्कृतं न वेत्ति, न तावत् कोऽपि तं विद्वांसं पण्डितं वा कथयति। अस्माकीना ऐतिहासिका नृपालाः संस्कृतपण्डितान् कवीन् पुरोहितान् वा पूजयन्ति स्म। अधुनातनोऽपि सर्वकारस्तान् पूजयति प्रादृणाति च, अनुभवति च देशहिताय राष्ट्रस्योन्नतये च संस्कृतप्रचारस्यावश्यकताम्, व्यापारयति च तदर्थं सुविपुलां धनराशिम्।

इदानीं पाठशालासु गुरुकुलेषु माध्यमिकविद्यालयेषु महाविद्यालये विश्वविद्यालयेष्वपि च वर्तते संस्कृतस्य सुप्रतिष्ठितमासनम्। सर्वोऽपि परमादरेण संस्कृतमधीतेऽध्यापयति च। तथापि नाधुनातनान् संस्कृतपण्डितान् मन्दता परिजहातीति हन्त! विषीदति स्वान्तम्।

इदानीं मान्याः संस्कृताध्यापकाः स्वविषयेषु कौशलं न प्रदर्शयन्ति। संस्कृतं स्वकीयमिति तेषां स्वत्वाभिमानो न वर्तते। न तेऽधुना शास्त्राण्यधीत्य पाण्डित्यं लब्धुं प्रयतन्ते। न ते ज्ञानाय यतन्ते, ते यद्वा तद्वा यस्मात् कस्मादपि संस्कृतस्य नाम्ना स्वल्पमादाय धनं कामं चानुधावन्ति।

गतं धर्मशास्त्रं गता वेदविद्या
गतं रे गतं रे गतं न्यायसूत्रम्।
इदानीन्तनानां जनानां प्रवृत्तिः
सुबन्ते तिङन्ते कदाचित् कृदन्ते॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थसाध्येषु श्रमसाध्येषु वा विषयेषु परीक्षामुत्तरीतुमसमर्था दरिद्राः साधीयसीं गामिव संस्कृतभारतीमातरमाश्रित्य येन केनापि प्रकारेण एम० ए० परीक्षामुत्तीर्य लब्ध्वा च पाठकपदम्, वर्गेषु छात्रान् यद्वा तद्वा वाचयित्वा कालं व्यपगमय्य जीविकार्थं पयो-दुहन्ति। कथं नु वराकास्ते स्वयमविद्वांसोऽन्यान् विदुषः सम्पाद-यितुं प्रभवेयुः, 'स्वयं तीर्णाः परान् तारयन्ति' इति लोकोक्तेः।

तादृशां च तेषां पाठशालासु माध्यमिकशालासु च पाठयतां युगानि व्यतीतानि, नाद्यापि संस्कृतं शोचनीयां दशां परिहरति, इति फलमेवात्र प्रमाणम्। शालेयाध्यापकवर्गे संस्कृताध्यापकस्यैव वेतनं न्यूनं भवतीत्यपि प्रमाणयति, तस्याऽकौशलम्। 'यादृशी शीतलादेवी तादृशं खरवाहनम्' इति लोकोक्तेः।

गृहीतया शिक्षया विद्यया वा गुणानामाविर्भावो भवति, अव-गुणानामपोहनं च जायते।

विद्या ददाति विनयं विनयाद् याति पात्रताम्।

पात्रत्वाद् धनमाप्नोति धनाद् धर्मस्ततः सुखम्॥

इति सर्वेषां विदुषां मतम्। इदानीन्तनश्च छात्रवर्गो न शिक्षया विनय-मवाप्नोति, अपि तु सुदूरमविनीतः संजायते। स योग्यो न भवतीति धनमपि यथेच्छं लब्धुं न शक्नोति। धर्मस्य तु तयोपदेश एव नास्तीति चर्चैव नोपतिष्ठते।

सुखं तु सर्वोपि कामयते। तत्तु योग्यस्यायोग्यास्यपीष्टम्। विषयाणां ज्ञानं तु पशोरपि प्रकृत्यैव जायते। इदानीन्तनः आङ्गल-शालाशिक्षादीक्षितः स विषयानेव स्मरति। स विलासान् वाञ्छति। नित्यं चलचित्रदर्शनात् नृत्यमन्दिरेषु नटविटगायकानाम् हासवि-लासपरिहासान् पश्यतः तस्य कामनाः प्रवर्धन्ते। ज्ञानाभावात् न जातु स धर्मार्थकाममोक्षाणां क्रमं स्मरति। केवलमर्थकामौ चिन्तयन् स मार्गाद् भ्रश्यति पतत्यति च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात् संजायते कामः कामात्क्रोधोऽभिजायते ॥
क्रोधाद् भवति संमोह सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥

(इति भगवदुक्तेः)

यस्याः शिक्षायाः विद्याया वा फलं प्रणाशः, सा शिक्षा वा विद्या वेति कथं शक्यते वक्तुम्, या तु शिक्षा गुणानामाविर्भाव-स्थाने अविनयम्, अयोग्यताम्, अधनताम्, अधर्मताम्, असुखानि च प्रादुर्भावयेत्, तिरोभावयेच्च स्वबुद्धिं सुसंस्कृतिं चापि, कस्तां शिक्षां विद्यां वा ब्रूयात् ? इतीदानीमाङ्गलीं शिक्षामविद्यामाहुर्विद्वांसः। सा तु पदे पदे अनाचारान् दुराचारान् भ्रष्टाचारान् वा शिक्षयति जनान् । इति केवलं पाश्चात्यशिक्षादीक्षिता राज्याधिकारे स्थिता अपि देशहितान् लोकहितानापि च घ्नन्ति । ते हि स्वदेशे वसन्तोऽपि कोटपतलूनहेटबूटवन्तो जीविकार्थं भ्रमन्ति बहवः, कुर्वन्ति च विविधानि अकार्याणि । दुर्दशाः अनुभवन्तोऽपि ते बद्धा वानरा इव परकीयां सभ्यतामनुकुर्वन्ति, स्वकीयं कर्त्तव्यं परित्यज्य परकीयमनु-धावन्ति न तेषां पितरि पूजाबुद्धिः, न मातरि वन्दना, न गुरुषु श्रद्धा, नापि च विश्वासो मित्रेषु । न वर्तते तेषां देशकालानुरूपं व्यवहारज्ञानम् । स्वैरं विचरन्ति ते । न तेषां कोऽपि विधिः, नापि च निषेधः । इति ते न जातु धर्मार्थकामान् मोक्षं सुखं वा लभन्ते ।

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥

(इति गीतोक्तेः)

अस्मात् प्रणाशात् परित्राणाय संस्कृतमेव साम्प्रतं शरणम् । संस्कृतं खलु भारतीयायाः संस्कृतेः प्रतीकम् । इदं देवव्याहृतम्, दिव्यं च संस्कृतशिक्षायां भारतीयैः सुदृढो विश्वासः कर्त्तव्यः ।

CC-0.In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिक्षाधिकारिभिः देशस्य समुन्नतये भाषाणामध्ययनेषु चास्मै मुख्यं स्थानं दातव्यम्। सम्यक्तया संस्कृतस्याध्ययने जना धर्मात्मानः सत्यसन्धा दान्ताः शान्ताः सज्जनाश्च संपत्स्यन्ते। संस्कृतं न केवलं भारतस्यैव समुन्नतयेऽलम्, अपि त्वखिलस्य विश्वस्य कल्याणाय सुपर्याप्तम्। भाषासु संस्कृतमेव अन्ताराष्ट्रीयमञ्चे स्थातुं योग्यम्, यतः दूरदेशीयासु पाश्चात्यभाषास्वपि वर्तते संस्कृतशब्दानां प्राचुर्यम्।

इदानीन्तनं विज्ञानं पदार्थज्ञानं वाऽध्येतुं संस्कृतस्य कोषाः न केवलं पूरकाः सन्ति, अपि तु विशेषा एव सन्ति। को न जानाति कामदुहः संस्कृतव्याकरणस्य वैशिष्ट्यम्। धातु प्रत्यय प्रत्ययान्तेभ्यो नित्यं नवीनान् विशिष्टान् सरसान् अर्थगुरून् च शब्दान् सुतरां प्रणेतुं पारयति संस्कृतं शब्दशास्त्रम्। संस्कृतं खल्वमराणां भारती, यस्य च नित्या शब्दावलिः, वीचीतरङ्गन्यायेन विहायसा सार्धम्, अखिलायामपि सृष्टौ युगपदेव व्याप्तिं लभतेऽनुप्रविशति च स्वशक्त्या जगतां व्यवहारद्वाराणि। संस्कृते न केवलं शब्दाढ्यत्वम्, अपि तु अर्थगौरवमपि विशेषेण वर्तते। संस्कृते विविधानि शास्त्राणि प्रणीतानि सन्ति। नहीह कोऽपि विषयः, यस्मिन् संस्कृतानां मुनीनां सुसंस्कृता लेखनी चमत्कारं नादर्शयत्। संस्कृते लिखितानि शास्त्राणि पठित्वा पामरा अपि आवर्जिता भवन्ति, इति सन्ति बहुशो निदर्शनानि।

भारतं सुचिरात् ज्ञानेषु विज्ञानेषु विद्यासु कलासु राजनीतिषु धनव्यवहारेषु धर्मव्यवस्थासु वाणिज्ये कृषिविद्यायां, स्थापत्ये, अन्येषु च बहुषु व्यवहारविषयेषु संस्कृतस्य माध्यमेनैव गौरवमभार्षीत्। इदानीमपि भारतीयं सनातनं तद् वैभवं तेनैव माध्यमेन वर्तते प्रायः सुरक्षितम्, इति निःसंदेहं विधिना संस्कृतमधीत्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीयो जनो विशेषो भविष्यति । संस्कृते यद् वैशिष्ट्यं तदन्यत्र नास्ति, यच्चान्यत्र वर्तते तत्सर्वं संस्कृते वर्तते ।

यद्यदिष्टं यदुत्कृष्टं यद् भव्यं यद् ग्रहेलिमम् ।
यच्च भद्राय भद्रं च तत्सर्वं संस्कृते स्थितम् ॥

राष्ट्रस्य समुत्थाने शिक्षा कारणम् । यदा भारते स्वकीया शिक्षाऽसीत्, तदानीं भारतं सर्वेषां देशानां मूर्धन्यमासीत् । दूरदेशेभ्योऽपि छात्राः नालन्दां तक्षशिलां च विद्या अध्येतुमागच्छन् । भारताज्जनाः ज्ञानं विद्याः कलाः सभ्यतां संस्कृतिं चावाप्नुवन् । यथाह भगवान् मनुः--

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

इदानीं देशस्य हितैषिभिः भारतीयैः शिक्षा विद्भिः शिक्षणाधिकारिभिश्च हठात् संस्कृतस्य प्रचारः कर्त्तव्यः । संस्कृतशिक्षा हि भारते छात्रेषु संजातानां दोषाणाम्, अविनयानाम्, जनेषु दुश्चरितानाम्, अशिष्टतानाम्, चौर्याणाम्, भ्रष्टाचाराणाम्, कातर्याणाम्, बुभुक्षाणाम्, महर्घतानामन्येषां चापि स्वभावदुष्टानां रोगाणामौषधं भविष्यति ।

स्वदेशस्य कल्याणं कामयमानाः केन्द्रीयशिक्षाविभागाधिकारिणो योग्यान् विशेषान् संस्कृतविदुषोऽन्विष्य सत्वरमुपागच्छेयुः यतेरन् च तदुपदिष्टेन पथा संस्कृतशिक्षणे सविशेषम् । संस्कृतं साम्प्रतं बहूपद्रववता रोगराजेन गृहीतस्य भारतस्य कृते संजीवनमौषधम् ।

भारतस्य गदार्तस्य कृतेऽपथ्यनिषेविणः ।
संस्कृतं वैद्यवर्येण भेषजं सुनिरूपितम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बालसुभाषितानि

[१]

वसन्तरण्येषु चरन्ति घासं
  पिबन्ति तोयान्यपरिग्रहाणि ।
तथापि वध्या हरिणाः नराणां
  को लोकमाराधयितुं समर्थः ॥

[२]

नरस्य चिह्नं नरकागतस्य
  विरोधिता बन्धुजनेषु नित्यम् ।
सरोगिता नीचजनस्य सेवा
  सदैव क्रोधः कटुका च वाणी ॥

[३]

पुराणमित्येव न साधु सर्वं
  न चापि कार्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते
  मूढः परप्रत्ययनेयबुद्धिः ॥

[४]

धनेन किं यो न च धर्ममाचरेत्
  बलेन किं यश्च रिपून् न बाधते ।
श्रुतेन किं यो न च धर्ममाचरेत्
  किमात्मना यो न जितेन्द्रियो भवेत् ॥

[५]

मनीषिणः सन्ति न ते हितैषिणः
  हितैषिणः सन्ति न ते मनीषिणः
सुहृच्च विद्वानपि दुर्लभो नृणां
  यथौषधं स्वादु हितं सुदुर्लभम् ॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतं राष्ट्रभाषापदमर्हति

विशिष्टं सांस्कृतिकं जीवनं नाम भारतीयं जीवनम् । भारतीया संस्कृतिश्च संस्कृतमया इति भारतीयस्य राष्ट्रस्य संस्कृत महत्वपूर्णं घटकामङ्गम् । यः कोऽपि संस्कृतं द्वेष्टि, स भारतीयां संस्कृतिं द्वेष्टि, यश्च संस्कृतिं द्वेष्टि स भारतीय राष्ट्रं द्वेष्टीति न सुदूरादपि शब्दार्थसम्बन्धो घटते ।

अनुदारवृत्तिभिः कैश्चित् स्वार्थपरायणैः प्रदेशवादं भाषाविवादं वापि समुत्थाप्य भारतीयं राष्ट्रजीवनमुत्पाटितम् । संस्कृतम्, संस्कृतिं च विना वस्तुतो भारतं भारतं नास्ति ।

संस्कृतं वाङ्मयं खलु भारतस्य मौलिकं वाङ्मयम् । आवैदिकात् कालात् सर्वमपि साहित्यं संस्कृते एव लिखितमुपलभ्यते । प्रदेशीयाः सर्वा अपि भाषाः संस्कृतादेव जनिं लेभिरे । संस्कृतभाषाऽन्यासां तासां जननी जीविनी च । कथं नाम हिन्दी वा महाराष्ट्री गुर्जरी वा सत्यां संस्कृतमातरि राष्ट्रभाषास्थानं लभेरन् । भारते संस्कृतमेव राष्ट्रभाषाऽपदमर्हति ।

यदि तु प्रारम्भात् संस्कृतं राष्ट्रभाषाऽभविष्यत्, तर्हि न जातु देशस्य विभागोऽभविष्यत् । संस्कृतं भारतस्य प्राकृतमैक्यम् । ये राजकीया जनाः संस्कृतमजानन्तः तस्य गुणेष्वनभिज्ञाः त एव संस्कृतं द्विषन्ति । ये च राजपुरुषाः संस्कृतं न जानन्ति ते संस्कृते लिखितां भारतीयां राजनीतिमवगन्तुमयोग्याः एव सन्ति । न ते भारतीये राष्ट्रे राजपुरुषासनमर्हन्ति । न कोऽपीह स्वकीयं भारतीयं शास्त्रजातमनधीत्य भारतीयं नेतृत्वमर्हति । यथाह भगवान् मनुः--

सैनापत्यं च राज्यं च दण्डनेतृत्वमेव च ।
सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्माकं प्रधानो मन्त्री पं० श्रीनेहरुः भारतीयां राजनीतिमपठित्वैव 'यवना अस्माकं मित्राणि भविष्यन्ति। हिन्दुयवनयोरैक्ये सति पाकिस्तानविभागोऽपि न दोषाय इति मन्यते स्म। परन्तु सर्वं तद् विरुद्धमेवाभवत्। काश्मीरस्य विभाजनं न भविष्यतीति प्रधानो मन्त्री पुनरपि कथयामास। अद्यापि तत्कथनं संदेहास्पदमेव। संयुक्तमहाराष्ट्रं न भविष्यतीति तृतीयमपि तस्य कथनं वितथमासीत्। गोवा महाराष्ट्रे सम्मिलितु न शक्नोतीति पुनः पुनरपि नेहरुमहानुभावः कथयति। इदमपि न तथ्यमिति सर्वोऽपि जानाति।

पश्यन्तोऽपि न पश्यन्ति--

राष्ट्रपतेः, प्रधानमन्त्रिणः, शिक्षामन्त्रिणः, राजपालानां च विश्वसंस्कृतपरिषदा सह सम्बन्धः पूर्णः परिचयश्चापि वर्तते एव। कथं ते संस्कृतस्योद्धाराय न दृढमुपक्रमन्ते। संस्कृतस्य गीतानि गीत्वैव विरमन्ति।

इदानीं सर्वकारः संस्कृतप्रचाराय उपक्रमते। विद्यालयेभ्यः संस्कृतप्रचारकेभ्यश्च आर्थिकीं सहायतामपि करोति। अधुनापि विलम्बो नास्ति। इतः परं सः विचार्योचितं कुर्याद् इत्यस्माकं सूचनम्।

संस्कृतस्य प्रचारः शीघ्रातिशीघ्रं भवेद् इत्यस्मिन् विषये सर्वकारः कृतानुभवान् विदुषः आपृच्छेत्। काममपि विशेषां संस्कृतसंजीविनीं योजनां च स्वकीयशिक्षाविभागद्वारा प्रचालयेत्। सति सार्वभौमे संस्कृतप्रचारे बहवः संस्कृतस्य संस्कृतेश्चाभिज्ञाः अनेके विशिष्टाः विद्वांसः बिरलाश्च भारतीयराजनीतिकुशलाः सार्वदैशिकराजनीतिनिपुणाः सर्वज्ञकल्पाश्चावश्यं भविष्यन्ति। त एव स्वतन्त्रस्य भारतस्य राष्ट्रधुरं वोढारः इत्यस्माकं हार्दम्।

इदानीं भारतीयस्य शिक्षाविभागस्य परिस्थितिर्दयनीया वर्तते। शिक्षणालयेषु अपरिचिताः शिक्षकाः सम्यग् विधिना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्यं कर्त्तुं न शक्नुवन्ति । कस्याः अपि भाषायाः विषयस्य चापि तेषां ज्ञानं सदोषं स्वल्पं च जायते । संस्कृतस्य ज्ञानं विना न जातु भारतीयानां छात्राणामुपाधिपरीक्षान्तं कृताधीतीकानामपि पूर्णं भवति शिक्षणम् ।

संस्कृतमिदानीं यया शैल्या माध्यमिकशालासु पाठ्यते, तस्याः ते शिष्या उद्विजन्ते, हताशाः मुञ्चन्ति च संस्कृतपठनम् । पुरातनी रटनप्रणाली नाधुनातनेभ्यश्छात्रेभ्यो रोचते । पुनश्च व्याकरणं वर्जयित्वा पाठनमपि व्यर्थं भवति । व्याकरणं विना संस्कृतं न भवतीति जानन्तोऽपि पाठकाः व्याकरणविज्ञानविमूढास्ते यद्वातद्वा पाठयित्वा छात्रान् परीक्षास्वुत्तीर्णान् कुर्वन्ति । उत्तीर्ण-परीक्षाः लब्धप्रमाणपत्रा अपि ते च संस्कृतशब्दोच्चारणेऽक्षमा सन्तः, आशक्ताः तत्पदं गन्तुं ततो निन्दां प्रकुर्वते ।

प्रारम्भादेव संस्कृतवर्णमालाशिक्षणं भारतीयानां बालकानां हिताय भविष्यति । संस्कृतं संस्कृतेनैव शिक्षणीयम् इत्यपि पर-मावश्यकम् । सर्वेषां पाठ्यविषयाणां शिक्षणं संस्कृतनैव भविष्यति प्रारब्धव्यम् इत्येषु विषयेषु बालसंस्कृतानाम् आस्माकं कार्यकौशलं सर्वकारेण द्रष्टव्यमिति वयमुदघोषयामहे ।

संस्कृतं खलु हस्तिनः पादः । पठिते संस्कृते 'सर्वं पादं हस्ति-पादे निमग्नम्' इति न्यायेन सर्वाः भाषाः पठिताः भविष्यन्ति । विना संस्कृतस्य ज्ञानेन भारतस्य निर्वाहो न सुकरः इति विद्वांसो मन्यन्ते । संस्कृतपठनं भारयातीनां कर्त्तव्यम् । ते संस्कृतं पठित्वैव सिद्धिं लप्स्यन्ते । स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते पुमान् इति भगवद्वचनात् । इति स्वतन्त्रे भारतेऽधुना संस्कृतं राष्ट्रभाषा-पदमर्हति ।

संस्कृता भारती सेयं राष्ट्रभाषा पदे क्षमा ।
क्षमाय सर्वलोकानाममरत्वाय चाप्यलम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयत्नेन कार्येषु सिद्धिर्जनानाम्

—०—

प्रयत्नेन कार्येषु सिद्धिर्जननां
प्रयत्नेन ज्ञानेषु वृद्धिर्जनानाम् ।
प्रयत्नेन युद्धेषु जीतिर्जनानां
प्रयत्नो विधेयः प्रयत्नो विधेयः ॥
प्रयत्नेन धीराः समुद्रं तरन्ति
प्रयत्नेन वीरा गिरीन् लङ्घयन्ते ।
प्रयत्नेन प्राज्ञाः वियत्प्रोत्पतन्ति
प्रयत्नो विधेयः प्रयत्नो विधेयः ॥२॥
कठोरं प्रयत्नात् मृदुत्वं प्रयाति
प्रयत्नाद् विदोऽसंभवं भावयन्ति ।
प्रयत्नादसाध्यं सुसाध्यं प्रयाति
प्रयत्नो विधेयः प्रयत्नो विधेयः ॥३॥
विडालाः प्रयत्नेन गव्यं लभन्ते
शृगालाः प्रयत्नेन द्राक्षाः स्वदन्ते ।
प्रयत्नेन सिंहो वराहान् निहन्ति
प्रयत्नो विधेयः प्रयत्नो विधेयः ॥४॥
प्रयत्नाद् दुरापः सुखापो जनानां
प्रयत्नादचिन्त्यं सुचिन्त्यं जनानाम् ।
प्रयत्नेन किं किं न साध्यं जनानां
प्रयत्नो विधेयः प्रयत्नो विधेयः ॥५॥
प्रयत्नेन पाकाः जिता भारतीयैः
प्रयत्नेन चीनाः जिता भारतीयैः ।
प्रयत्नेन मुक्ता वयंः भारतीयाः
प्रयत्नो विधेयः प्रयत्नो विधेयः ॥६॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कादम्बरी-कथा

—०—

अष्टमादङ्कादनुसृतमे

अत्रान्तरे प्रविश्य प्रतीहारी व्यज्ञापयत्--युवराज ! श्रुतं पत्रलेखाऽऽगता, तवापि दृष्टस्य कतिपयदिनानि व्यपगतानि, इत्यनयां सहैव आगच्छ, इति समादिशति देवी। चन्द्रापीडस्तु-अहो दोलारूढं मे जीवितम्। बलवान् जननी-स्नेहः। अम्बा निमेषमपि मां त्यक्तुं नेच्छति, गरीयांश्च गन्धर्वसुतानुरागः। दुस्त्यजं राज्यम्। परिणेतव्या कादम्बरी। सत्वरं वर्तते मनः, सुदूरं हेमकूटम्, इति चिन्तयन्नेव जननी-सामीप्यमवाप्नोत्, अनयच्च तत्रैव दिवसम्।

इत्थं च चिन्तातुरस्यैव राजकुमारस्य बहूनि दिनानि व्यतीतानि। एकदा सायं शिप्रातटे परिभ्रमन् अतित्वरया आगच्छतः तुरगारूढान् वीक्ष्य, के ते इति ज्ञातुं रक्षापुरुषं प्राहिणोत्, स्वयं च शिप्रामुत्तीर्य कार्तिकेयमन्दिरं तं प्रतीक्षमाणोऽतिष्ठत्। क्षणेन चाश्वादवतीर्य प्रणमन्तं विषण्णमुखं केयूरकं वीक्ष्य 'एह्येहि इत्याहूय दोर्भ्यां पर्यष्वजत, अयासीच्च तेन सह भवनम्, तत्र च पत्रलेखया नीतं ताम्बूलं गृहीत्वा आसनोपविष्टः–कथय केयूरक ! देव्याः कादम्बर्याः महाश्वेतायाश्च सन्देशम्, इति तमपृच्छत्। स तु सप्रश्रयमब्रवीत्–देव ! नास्ति कश्चिद् सन्देशः। यदैवाहं पत्रलेखां मेघनादाय समर्प्य देवस्योज्जयिनीप्रयाणसन्देशं निवेदितवान्, तदैवोर्ध्वं विलोक्य दीर्घमुष्णं च निश्वस्य महाश्वेता पुनः तपोवनमयासीत, कादम्बरी चापि दुःखिता शयनभवनमविशत्। अन्येद्युः प्रातः उपसृतं मां विलोक्य–सत्सु भवत्सु अहमीदृशीमवस्थामनुभवामि, इत्युपालभ्य सा मौनमग्रहीत्। अहं तु दुःखितया तया गमनाय आदिष्टमिवात्मानं मत्वा अनिवेद्यैव तां देवपादमूलमुपगतोऽस्मि। महान्तमायासमनुभवति भवदर्थेऽधुना कादम्बरी, तत् शीघ्रमेव भवताऽऽगन्तव्यम्, इत्यावेदयन्तम्–दूरेऽपि स्थितं प्रियजनं सम्भा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चयितुं प्रयतिष्ये इत्यभिधाय स केयूरकं विश्रान्तये आदिशत् ।

अत्रान्तरेऽस्तमगच्छद् भगवान् सहस्ररश्मिः । उदयाचलसमारूढे च भगवति चन्द्रमसि कुमारः शय्यामगच्छत् । तत्र च तातेन स्वभुजाद् अवतार्य राज्यभारो मयि निहितः, इति पदमपि न शक्नोमि तमनापृच्छ्य गन्तुम् । अम्बास्नेहोऽपि मां परिबध्नाति । वैशम्पायनोऽपि सुदूरे वर्तते । किं करोमि एकाकीदानीमिति चिन्तयः एव सर्वारात्रिः व्यपागच्छत् । प्रातश्च–दशपुरं प्राप्तः स्कन्धावारः इति वृत्तान्तं लब्ध्वा प्रहृष्टचेताः चन्द्रापीडः, 'करतलगतां सिद्धिमवेहि' इति केयूरकमकथयत् । स तु देव ! नाहमत्र स्थितः किमपि करोमि असह्या वर्तते कादम्बर्याः वेदना । आशा हि जीविताल्म्बिनी भवति । तद्देवागमनमावेदयितुमिदानीमेव गमनादेशमिच्छामि लब्धुम् इति प्रार्थयत् । चन्द्रापीडस्तु–साधु चिन्तितम्, गच्छ त्वं पत्रलेखया सह देवीपादमूलम्, इत्युक्त्वा-मेघनाद ! हेमकूटमार्गमुद्दिश्य पत्रलेखया सह केयूरकं दशपुरदापतन्तं मार्गं नय, अहमपि वैशम्पायनं मिलित्वाऽनुपदमेवाऽऽगच्छामि ततश्च पत्रलेखामाहूय–भवत्या मार्गे मदीचिन्ता न करणीया । स्नानभोजनवेला नातिक्रमणीया । ज्ञातेन या पथा यातव्यम्, मम जीवितं तव हस्ते वर्तते इत्युक्त्वा मां नेतुं त्वयाऽनया सह महाश्वेताश्रमं यावद् आगन्तव्यम् इति सेनाध्यक्षमादिश्य मां पत्रलेखां च व्यसृजत् । निर्गतयोः आवयोः राजकुमारः पितुः पार्श्वं गत्वा वैशम्पायनं नेतुं शुकनासमुखेनात्मानं मोचयित्वा जननीभवनमगच्छत्, प्रत्युषसि चन्द्रायुधमारुह्य तुरङ्गमबलेन सार्धं दशपुरगामिना मार्गेण प्रारभत गन्तुम् ।

उदिते च भानौ स क्रोशे आयान्तं स्कन्धावारमपश्यत्, सजवेन इन्द्रायुधेन सस्वरं स्कन्धावारं प्रविश्य क० वैशम्पायनः इत्यपृच्छत् ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्कः किं किं करोति

रघुः—माधवः किं करोति ?	मधुः—स खगं पश्यति ।
बालः किं करोति ?	स दुग्धं पिबति ।
मानुषः किं करोति ?	स पत्रं लिखति ।
नरः किं करोति ?	स नगरं गच्छति।
छात्रः किं करोति ?	स पाठं पठति ।
लेखकः किं करोति ?	स पुस्तकम् लिखति।
शूरः किं करोति ?	स शत्रून् हन्ति ।
भृत्यः किं करोति ?	स भारं वहति ।
नटः किं करोति	स तूष्णीं नृत्यति ।
वादकः किं करोति ?	वाद्यं वादयति ।
जाबालः किं करोति ?	स अजाः चारयति ।
नापितः किं करोति ?	नापितः क्षौरं करोति ।
वर्धकिः किं करोति ?	स उपकरणं करोति ।
स्वर्णकारः किं करोति ?	स भूषणानि करोति ।
चर्मकारः किं करोति ?	स उपानहौ करोति ।
रङ्गाजीवः किं करोति ?	स वस्त्राणि रञ्जयति ।
कुम्भकारः किं करोति ?	स पात्राणि रचयति ।
मालिकः किं करोति ?	मालिकः वृक्षान् सिंचति ।
रजकः किं करोति ?	स वस्त्राणि धावति।
तन्तुवायः किं करोति ?	स वस्त्राणि वयति ।
कृषाणः किं करोति ?	स क्षेत्रं कृषति ।

कृषाणः कृषति क्षेत्रं रजको धावते पटम् ।
करोति वर्धकिः खट्वां कुलालः कुरुते घटम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बुद्धिशाली वणिक्सुतः
(गद्यम्)

—०—

पुरा काश्यां कोऽप्येकः वणिक्पुत्रः आसीत् । तस्य व्यापारे नित्यं हानिरभवत् । स दरिद्रः अजायत । स विदेशं गन्तुं मनसि अचिन्तयत् ।

तस्य गृहे लौहपलसहस्रेण घटिता एका महातुलाऽभवत् । स तां कस्यापि वणिजः गेहे निक्षिप्य देशान्तरमगच्छत् । तत्र व्यापारं कृत्वा स धनानि चार्जित्वा पुनरागत्य यावत् तस्मात् वणिजः तां तुलामयाचत, तावत् स वणिक् 'मूषिकैः भक्षिता सा' इत्यब्रवीत् ।

'सत्यं कथमसि त्वम्, मधुरमासीत् तल्लौहम्, नूनं तद् आखुभिः भक्षितं भवेत्, इति सस्मितं स तम् अभ्यधात् । ततः स वणिक्सुतः तस्माद् वणिजः भोजनं दातुं स्वीकरोक्तिमददात् । तदा बुद्धिमान् वणिक्पुत्रः दत्तामलकहस्तकं तस्य वणिजः पुत्रं सह कृत्वा स्नातुं नदीं प्रायात् । न स नद्यां स्नात्वा तं बालकमादाय स्वमित्रस्य गृहमगच्छत् । तत्र स तमर्भकं गुप्तं निक्षिप्य पुनरेकाक्येव वणिजः गृहमुपातिष्ठत् । 'क्व मम पुत्रः' इति स वणिक् तमपृच्छत् । 'श्येनेन नीतः' इति सोऽवदत् ।

न क्वापि श्येनाः बालकान् नयन्ति । त्वया चोरितो मम पुत्रः इत्यभिधाय स वणिक् बुद्धिमन्तं तं वणिक्सुतं राजकुलेऽनयत् । तत्रापि राजपुरुषैः पृष्टः स वणिक्सुतः, 'श्येनेन भक्षितोऽर्भकः' इत्येवाकथयत् ।

असंभवमिदम्, कथमिव श्येनोऽर्भकं नयेत्,' इति राजपुरुषाः अवादिषुः । यत्र लौहीं तुलां मूषिकाः भक्षयेयुः तत्र श्येनो द्विपमपि, नयेत्, किं पुनरर्भकं' इति वणिक्सुतः प्रत्यवादीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'कथमिव' इति राजपुरुषैः पृष्टः वणिक्सुतः सर्वं वृत्तान्तमादितः व्याख्यात्। ततः तस्य तैः तस्य तुला दापिता। सोऽपि तस्य पुत्रमानीयाददात्। द्वौ अपि तौ स्वस्वगृहमगच्छताम्। अत उच्यते—

मायाविनो जयन्तीत्थमसत्यान् छलचेतसः।
साधयन्ति च कार्याणि विविज्ञाः बुद्धिशालिनः॥

प्रहेलिकाः

[१]

रणोऽस्मि पूर्वेण विनाक्षरेण
काणोऽस्मि मध्येन विनैव तेन।
कारोऽस्मि नित्यं च विनाऽन्तिमेन
वर्णैः त्रिभिः कोऽस्मि वदन्तु शाब्दाः॥

[२]

नृत्यामि नित्यं धवलास्तरेषु
गत्या च सङ्केतपरा मनःस्थम्।
गम्भीरमर्थं प्रकटीकरोमि
नीलानना काऽस्मि नितान्ततन्वी॥

[३]

पिबामि वारिणि चरामि चाग्निं
धावामि तैक्ष्णेन पथा सबाष्पा।
नयामि लोकान् त्वरितं सभारान्
समर्चिताहं भुवनेषु काऽस्मि॥

१—कारणम् २—लेखनी ३—धूम्रशकटी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चलचित्रदर्शनम्

—०—

सुषमा—अहो ! बहोः कालान्न वयं चलचित्रं द्रष्टुं गताः । इदानीं महाभारतं नाम चलति चित्रम् । अद्य तद्दर्शनार्थं गन्तुं प्रार्थयामः पितरम् ।

(बालाः खेलं विहाय पितुः समीपं यान्ति)

सर्वे—तात ! अद्य चित्रं द्रष्टुं चलेम महाभारतीयं चित्रं चलतीदानीम् ।

पिता—अस्तु, गच्छेम । अवकाशोऽस्ति भास्करवासरेऽद्य जनसंमर्दो भविष्यति । सर्वे सज्जा भवन्तुः । इदानीं पञ्चवादनसमयः षड्वादनवेलायां प्रदर्शनं प्रारभते ।

(सर्वे वस्त्राणि परिधाय पितुरमनुगच्छन्ति पश्यन्ति चचलचित्रद्वारे पंक्तौ स्थितान् जनान्)

रमेशः—अहो ! जनानां महान् सम्मर्दः ?

सुषमा—किं नु गृहकार्याणि विहाय सर्वे पौरा अत्रैव समागताः ?

पिता— तदेतत् गृहे एव मया प्रोक्ता यूयम्, प्रतीक्षन्तामत्रैव, अहमभिज्ञानपत्रं क्रीत्वा आनयामि ।

(सर्वे प्रतीक्षमाणः तिष्ठन्ति, पिताऽभिज्ञानपत्रं गृहीत्वा आगच्छति प्रविशान्ति च सर्वे चित्रगृहम्)

बालाः—अहो ! सुन्दरं स्थानम् । लब्धमस्माभिः सुखासनम् ।

पिता— अलं कोलाहलेन । दीपा निर्वापिताः सन्ति, आरभते इदानीं चित्रदर्शनम् ।

सुषमा—किमिदं तात ! सुन्दरं भवनम् । किमर्थं चात्र एते राजानो राजकुमाराश्च समवेताः सन्ति ?

पिता— अयमत्र पाण्डवानां प्रासादः । धर्मराजो युधिष्ठिरः अश्वमेधं नाम यज्ञं समारभते । एतेऽत्र निमन्त्रिता महीपतयः सोपा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यनहस्ता महाराजं नमन्ति ।

आशा--पश्यतु भवान् तं राजानम् । स्खलितस्य तस्य मुकुटं भूमौ पतति । तस्य शिरः भित्तौ आहतम् ।

सुषमा--पश्य, ताः पतितं तं राजकुमारं हसन्ति । एका च 'अन्धानामन्धा एव जायन्ते' इति मर्म वचनानि भाषते । काऽस्ति सा ?

पिता— सा द्रौपदी महिषी पाण्डवानाम् ?

उमा— अहो परिवर्तितः पटः । ते सर्वे राजकुमारा द्यूतं रममाणाः सन्ति । के ते ?

पिता— ते कौरवाः पाण्डवाश्च द्यूतं रमन्ते ।

सुरेशः--अरे ! द्यूतम् ! निन्दितमारभन्ते । तच्च-

सत्यं हन्ति निहन्ति धर्मचरितं शौचं न संरक्षति
अर्थान् नाशयते करोति विकलं सन्मानसं मानुषम् ।
पैशुन्यं तनुते दधाति कितवं भद्रं समाकर्षति
दुःखानि प्रतनोति हन्ति सुकृतं द्यूतं नृणां नाशकृत् ॥

पिता--- अत्र कः सन्देहः । नाशकृदेव द्यूतं मानुषाणाम् । विनाशकाले जनो निन्दितमाचरति । इतः कौरवैर्जिताः पाण्डवाः राज्यभ्रष्टाः वनं गमिष्यन्ति, लप्स्यन्ते चाविचार्यरकृतस्य फलम् ।

केशवः--अहो इदानीं पाण्डवा वनं गच्छन्ति । स्त्रियौ चापिताननुयातः।

रमेशः—ननु के के सन्ति ते ?

पिता— ते युधिष्ठिरः, भीमः, अर्जुनः, नकुलः, सहदेवः राज्ञी द्रौपदी, माता कुन्ती च ।

सुरेशः— ननु कियन्ति वर्षाणि वने स्थास्यन्ति ?

पिता— ते त्रयोदश वर्षाणि वने स्थास्यन्ति ।

सुषमा---ननु दीप्ताः सन्ति प्रदीपाश्चलचित्रगृहस्य पुनरधुना । समाप्तं किं प्रदर्शनम् ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिता— नहि न, समाप्तमिदानीम् । अयं मध्यावकाशः पञ्चदश कलानाम् ।

दिनेशः—अहो ! सम्यग् अभिनीतम् । नटानां नटीनां च भाषणमपि स्पष्टं श्रूयते ।

पिता—अवलोकयन्तु वत्साः ! पुनरिदानीमवशिष्टं चित्रम् ।

सर्वे— ते सन्ति कौरवाः सभायां समवेताः । स च भगवान् श्रीकृष्णः वनवासात् निवर्तितानां पाण्डवानां पक्षात् इतो भगवान् श्रीकृष्णः आगत्य पुनस्तेभ्यो राज्यं दातुं संदिशति । दुर्योधनः राज्यं दातुं न कामयते 'सूच्यग्रं नैव दास्यामि विना युद्धेन केशव' इति च सगर्वमाघोषयति ।

सुरेशः—अहो गर्वः ! धिक् पापम् ।

आयासकोपभयदुःखमुपैति मर्त्यो
गर्वेण सर्वजननिन्दितपापरूपः ।
विद्यादयादमयमादितगुणांश्च हन्ति
ज्ञात्वेति गर्ववशमेति न शास्त्रबुद्धिः ॥

सुषमा=कुतः लुब्धस्य तस्य शास्त्रबुद्धिः । ननु भविष्यतीदानीं युद्धम् ?

पिता— आम्, इतः परं पाण्डवानां युद्धं भविष्यति ।

सुरेशः—अहो महतीयं कौरवाणां सेना समुपस्थिता ।

रमेशः—इदं च साम्मुखीनं वीराणां पाण्डवानां दलम् ।

उमा— अहो ! महत् बलं कौरवाणाम् । अवश्यमेते जेष्यन्ति,

पिता— नहि नहि, भगवान् श्रीकृष्णो रक्षिष्यति पाण्डवान् ।

उमेशः—ननु कोऽयं युवा वीरः, धीरस्य पीताम्बरस्य शत्रुवीरस्य कस्य चरणयोः वाणं क्षिपति शिरोनम्रम् ।

पिता— स खलु गाण्डीवधन्वा अर्जुनः, गुरो द्रोणाचार्यस्य चरणयोः वाणेन प्रणमति शिरोनम्रम् ।

रमेशः—अहो विवेको विनयश्च राजकुमारस्य ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिता— अत्र कः सन्देहः। विनीता विवेकिनश्च भवन्ति खलु राजपुत्राः

सुरेशः—अहो! कौशलं वृद्धवीरस्य। स क्षणेनैव सहस्रशो योद्धृणां शिरांसि पातयन्नग्रसरः प्रतिभाति।

पिता— एष खलु द्रोणाचार्यः। यस्य खलु--

मुखाग्रे निखिला वेदाः कराग्रे सशरं धनुः।
उभयोः द्रोणासामर्थ्यं शापादपि शरादपि॥

सुरेशः—अहो! गौरवमाचार्यस्य। ननु क एषोऽनर्जुशरैराहतस्य धनुर्वेदाचार्यस्य पूज्यस्य परित्यक्तशस्त्रस्य शिरच्छेदं करोति पापः।

पिता— एष किल धृष्टद्युम्नः पूर्वशत्रुः द्रोणाचार्यस्य।

सुरेश—आः! पाप!

रमेशः—अहो! पश्यति गदायुद्धं वीरयोः।

सुरेशः—ननु इमौ कौ वीरौ?

पिता— इमौ खलु भीमदुर्योधनौ। भीमः दुर्योधनं हनिष्यति।

रमेशः—ननु कौ इमौ किरीटधारिणौ घोरं युद्ध्यमानौ।

पिता— स युवा वीरोऽर्जुनः, वृद्धश्च पितामहो भीष्मश्चापि कौरवपक्षीयः। य एकाकी एव सर्वं पाण्डवसैन्यं हन्तुं शक्नोति।

रमेशः— तर्हिं हनिष्यत्येष पाण्डवान्, तेषां सैन्यं च। कौरवाणां विजयो भविष्यति।

पिता— पश्यन्तु श्रीकृष्णस्य मायाम्। स एष तृतीयस्य पाण्डवस्य वाणैः श्रान्तः शिखण्डिना हतः रणे पतति भीष्मपितामहः। सर्वानपि कौरवान् निहन्तीदानीमिमे पाण्डवेयाः योद्धारः।

रमेशः—ननु हताः सर्वेऽपि कौरवेयाः।

पिता—- आम्, हस्ताते। सत्यमेव विजयते नानृतम्।

(इति जवनिकापातः)

दर्शनं यद्विशुद्धानामृषीणां शास्त्रचक्षुषाम्।
दर्पणं चार्यवचानां तदेतच्चित्रदर्शनम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यायेनोपार्जितं नश्यति

आस्तां पुरा मिथिलायां कौचित् भ्रातरौ। तौ जात्या ब्राह्मणौ, शास्त्रेषु निपुणौ, तथापि दरिद्रौ अभवताम्। एकदा ज्येष्ठः कनिष्ठमब्रवीत्। हे भ्रातः! यतमानस्यापि दिवानिशं कुटुम्बं भरतो मम धनसञ्चयो न जायते इति चिन्तितोऽस्मि दरिद्रः सुतराम्। अन्यच्च–

दूये कान्ताकारं वीक्ष्य मणिकङ्कणवर्जितम्।
अतः परं परं दूये मणिकं कणवर्जितम्॥

कनिष्ठः– न भवति पूर्त्तिः कुटुम्बजठरस्य ममापि। वस्त्राभरणसञ्चयानां तु कथैव दूरमास्ते। दुःस्थिति खलु वर्ततेऽस्माकम्।

नातः पपीयसीं कश्चिदवस्थां शम्बरोऽब्रवीत्।
यस्यां नैवाद्य न प्रातः भोजनं तात विद्यते॥

ज्येष्ठः—तर्हि किं कर्तव्यमावाभ्याम्?

कनिष्ठः–इदानीं काणादम्, व्याकरणम्, काव्यम्, ज्योतिषं च सर्वं विहाय धनार्जनमेव कर्त्तव्यमवाभ्याम् यतः–

बुभुक्षितैर्व्याकरणं न भुज्यते
पिपासितैः काव्यरसो न पीयते।
न छन्दसा केनचिदुद्धृतं कुलं
हिरण्यमेवार्जय निष्फला गुणाः॥

ज्येष्ठः–नहि नहि, न गुणाः सर्वथा निष्फला भवन्ति। अस्माकं ज्योतिषम्, आयुर्वेदः, मन्त्रविद्या च सर्वदा खलु चमत्कारान् दर्शयन्ति।

अन्यानि शास्त्राणि विनोदमात्रं
प्राप्तेषु वा तेषु न तैश्च किञ्चित्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिकित्सितं ज्योतिषमन्त्रवादाः
पदे पदे प्रत्ययमावहन्ति ॥

कनिष्ठः-- शक्यं तात ! विद्याभिः धनार्जनं कर्त्तुम्, परन्तु गेहे स्वदेशे वा स्थितानां विद्यावतामपि पूजा न भवति । यथोच्यते--

स्वदेशजातस्य नरस्य नूनं
गुणाधिकस्यापि भवेदवज्ञा ।
निजाङ्गना यद्यपि रूपराशिः
तथापि लोकाः परदारसक्ताः ॥

ज्येष्ठः—इत्थं चेत् शीघ्रमेव स्वदेशं विहायान्यत्र गन्तव्यम् ।

स्थानमुत्सृज्य गच्छन्ति सिंहाः सत्पुरुषा गजाः ।
तत्रैव निधनं यान्ति काकाः कापुरुषा मृगाः ॥

कनिष्ठः--तर्हि नातिविलम्बेन प्रस्थातव्यम् । वर्तिष्यते श्वः पुष्ययोगः सम्मुखीनश्च यात्रायां चन्द्रः । ततो गृहं विहाय प्रचलितौ तौ दक्षिणाशां प्रति प्रस्थितौ मुम्बापुरीं प्राप्तौ, अवसतां च भाटकेन गृहीतगृहौ । नित्यं प्रातरुत्थाय स्नात्वा देवपूजां विधाय कृततिलकौ लम्बधौत्रौ धृतशिरोवेष्टनौ गृहीतमहापुस्तकौ च नगरे भ्रमन्तौ च तौ धनिभिः सञ्जातपरिचयौ अभवताम् ।

ततः प्रारब्धः ताभ्यां वैद्यकेन ज्योतिषेण मन्त्रविद्यया च धनञ्चयः । नित्यं च तौ मूर्खान् वञ्चयितुं प्रवृत्तौ । गच्छत्सु त्रिषु वर्षेषु ताभ्यां विपुलं धनं संगृहीतम् । ततः ताभ्यां सुदृढः कोशः कारितः, भरितश्च सः स्वर्णदीनारैः आमुखम् ।

ततः कोशस्य रक्षाप्रश्नः उपातिष्ठत् । एकस्मिन् दिने ज्येष्ठो रात्रौ जागरणं कृत्वा तं रक्षति, अन्यस्मिन् दिने कनिष्ठश्च निशायां न निद्राति रक्षति च तं कोषम् । यस्मिन् दिने यस्य रक्षावारोऽभवत्, तस्मिन् दिने सोऽन्यस्य वधं विविधाय तं स्वर्णकोशं स्व-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीयं कर्त्तुं मनोरथान् घटयति स्म । सहजौ भ्रातरौ प्रगाढस्नेहौ चास्तां तौ इति स पापमनोरथः कार्यरूपं नाप्नोत् ।

अथ तौ गृहं न्यवर्तताम् । मार्गेऽहमहमिकया धनस्य रक्षा कृता ताभ्याम् । गृहस्य संनिधौ समागतयोस्तयोः मध्यात् ज्येष्ठः कोपं वहन्तं कनिष्ठमकथयत्– हे बन्धो! त्वमेव कोशस्यास्य स्वामी भव । अहं तु नेच्छामीमम् । यदा यदा हि कोषोऽयं मया' स्व रक्षायां नीतः, तदा तदैव त्वां हत्वाऽहमिमं धनं गृह्णीयाम्, इति मम दुर्विचाराः समुद्भवन् । अतोऽहं नैव मामये पापं धनमिदम्।

कनिष्ठः--प्रियबन्धो! ममापि तादृशः एव दूषिता विचाराः समुद्भवन्। इदानीमपि च मम मनसि दुर्विचारा उत्पद्यन्ते विलीयन्ते च। अयमस्मात् धनात् संजायमानो लोभः पापस्य कारणमिति मन्ये ।

लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥

इति बन्धुत्वप्रणाशकरमिदं धनमाताभ्यां त्याज्यमेव इत्थं कथयन्तौ तौ द्वारस्य समीपे एवावकरपुञ्जेऽक्षिपतां तं कोशम्, अवशितां च स्वगृहम् ।

ततः एकस्मिन् करे धृतवाकवकरकण्डा, अन्यस्मिन् हस्ते च गृहीतच्छुरिका तयोः भगिनी बहिरवकरं क्षेप्तुमागच्छत्, अपश्यच्च तं धनकोशम् नान्यः कोऽपि तां तं च पश्येत्, इति सा तं कोशमादाय गोप्तुमयतत । तदैव ज्येष्ठस्य भ्रातुः पत्नी केनापि कार्येण द्वारदेशमागता । ननान्दरमवकरपुञ्जात् किमपि गृह्णन्तीमपश्यत्-- 'किं करोषि भोः । आर्ये ! इत्यपृच्छच्च ।

ननान्दा भ्रातृजायया मया लब्धं धनं दृष्टमित्यनया शंकया करे गृहीतया छुरिकया सा सत्वरमाहता । सा चीत्कारमकरोत् । तच्छ्रुत्वा तस्य पतिरन्वधावत् । अन्येऽपि जनास्तत्र समागच्छन् । पला-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितुमक्षामापराधिनी च स्वच्छुरिकयाऽऽत्मानमहन् । अस्मिन्नन्तरे कनिष्ठो भ्रातापि समागच्छत्, अकथयच्च ज्येष्ठम्। पश्य भोः! बन्धो! क्षिप्तेनापि पापद्रव्येणानेनायमनर्थः कृतः। रक्षितं त्विदं न जाने किमनिष्टं कुर्यात ततो राजपुरुषा आगत्य तद् धनमनयन्। भ्रातरौ च व्यलपताम् ....

धनाशया खलीकारः कस्य नाम न जायते।
दूरादामिषलोभेन बद्धयते खेचरः खगः॥

—०—

मुरारजी गोकलदास मिल्स

स्पिनिंग एण्डवीविंग क० लि०

द्वारा निर्मित वस्त्रों की खरीदगी के लिये याद रखिए—

मिनलर खाकी, विविध ड्रिल्स्, धोतियां, साड़ियां, गादलापाट, चादरें, लाँगक्लाथ, कोटिंग, शर्टिंग, वायेल, मलमल, तथा विभिन्न प्रकार के मसराईज्डसूती वस्त्रों की

प्राप्ति का सर्वोत्तम स्थान है—

डा. आंबेडकर रोड, परेल, बम्बई नं. १२

फोन नं. : ६००२१ तार : 'मोगोको' बम्बई.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चाणक्य-नीतिः

दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता ।
अभ्यासेन न लभ्यन्ते चत्वारः सहजा गुणाः ॥

आत्मवर्गं परित्यज्य परवर्गं समाश्रयेत् ।
स्वयमेव लयं याति यथा राज्यमधर्मतः ॥

कूपोदकं वटच्छाया श्यामा स्त्री चेष्टिकागृहम् ।
शीतकाले भवेदुष्णं ग्रीष्मकाले च शीतलम् ॥

हस्ती स्थूलतनुः स चांकुशवशः किं हस्तिमात्रोऽङ्कुशः
दीपे प्रज्वलिते प्रणश्यति तमः किं दीपमात्रं तमः ।
वज्रेणापि हताः पतन्ति गिरयः किं वज्रमात्रा नगाः
तेजो यस्य विराजते स बलवान् स्थूलेषु कः प्रत्यय ॥

गृहासक्तस्य नो विद्या नो दया मांसभोजिनः ।
द्रव्यलुब्धस्य नो सत्यं न स्त्रैणस्य पवित्रता ॥

न दुर्जनः साधुदशामुपैति बहुप्रकारैरपि सेव्यमानः ।
आमूलसिक्तः पयसा घृतेन न निम्बवृक्षो मधुरत्वमेति ॥

अन्तर्गतमलो दुष्टः तीर्थस्थानशतैरपि ।
न शुद्ध्यति यथा भाण्डं सुरायाः वह्निपात् कृतम् ॥

न वेत्ति यो यस्य गुणप्रकर्षं स तं सदा निन्दति नात्र चित्रम् ।
यथा किरातो करकुम्भलग्नां मुक्तां परित्यज्य बिभर्ति गुञ्जाम् ।

ये तु संवत्सरे पूर्णे नित्यं मौनेन भुञ्जते ।
युगकोटिसहस्रं तैः स्वर्गलोके महीयते ॥

कामक्रोधो तथा लोभं स्वादु शृङ्ग रकौतुकम् ।
अतिनिद्रां दिवास्वापं विद्यार्थी संविवर्जयेत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अकृष्टफलमूलानि वनवासरतिः सदा ।
कुरुतेऽहरहः श्राद्धमृषिः विप्रः स उच्यते ॥
एकाहारेण सन्तुष्टः षट्कर्मनिरतः सदा ।
ऋतुकालाभिगामी च स विप्रो द्विज उच्यते ॥
पशूनां पालको नित्यं लौकिके कर्मणि रतः ।
वाणिज्यकृषिकर्मा यः स विप्रो द्विज उच्यते ॥
लाक्षादितैलनीलीनां कौसुम्भमधुसर्पिषाम् ।
विक्रेता मद्यमांसानां स विप्र शूद्र उच्यते ॥
परकार्यविहन्ता च दाम्भिकः स्वार्थसाधकः ।
छली द्वेषी मृदु क्रूरो विप्रो मार्जार उच्यते ॥
वापीकूपतडागानामारामसुरवेश्मनाम् ।
उच्छेदने निराशङ्कः स विप्रो म्लेच्छ उच्यते ॥
देयं भोग्यधनं जनैः सुकृतिभिर्नो सञ्चयस्तस्य वै ।
श्रीकर्णस्य बलेश्च विक्रमपतेरद्यापि कीर्तिः स्थिता ।
अस्माकं मधु दानभोगरहितं नष्टं चिरात् सञ्चितं
निर्वेदादिति हस्तपादयुगलं घर्षन्त्यहो मक्षिकाः ॥
परोक्तमात्रं यस्तथ्यं मन्यते बुद्धिवर्जितः ।
हसनीयः परेषां स शाखारूढो जटी यथा ॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्माकं पूजास्थानानि

भारतं देशोऽस्माकम् । विविधभाषाभाषिणः जनाः सन्ति देशे नः । तेषां धर्मा अपि पृथक् पृथक् सन्ति । तेषां पूजास्थानानि अपि सन्ति विभिन्नानि । कोऽपि मन्दिरं गत्वा विष्णुं शिवं देवीं गणेशं वा पूजयति । अन्यो मस्जिदे खुदाऽपरपर्यायं परमेश्वरं प्रार्थयते । परो गिरजागृहे गत्वा खृष्टाऽपरनामानमीश्वरं भजते । अपरश्च अग्न्यागारमुपेत्य स्वकीयं भगवन्तमाराधयति । सर्वेषां जनानां भावना रुचयश्च विभिन्नाः भवन्ति । तथापि वयमेकस्य पितुः परमात्मनः पुत्राः स्मः ।

इदं मन्दिरम् अत्र भगवतो विष्णोः शिवस्य देव्या गणेशस्य च मूर्त्तयो भवन्ति । सर्वे हिन्दवोऽत्र पूजार्थमायान्ति । ते पुष्पैः फलैः जलैः धूपैः दीपैः नैवेद्यैश्च भगवन्तं पूजयन्ति । अनेकदा रात्रौ अपि भक्ता भगवतो भजनं कीर्त्तनं च समाचरन्ति । भजनवेलायां मन्दिरस्य परिसरः शान्तः प्रसन्नः सुखदश्च संजायते । सायं प्रातः जना बहुधा मन्दिरं गच्छन्ति ।

इदमत्र मस्जिदस्थानम् । अत्र यवनाः प्रार्थनां कुर्वन्ति । शुक्रवासरेऽत्र भक्तानां संमर्दः संजायते । तदानीं सहस्रशो यवनाः युगत्प्रार्थनां समारभन्ते । इदं गिरजागृहम् । अत्र ख्रिष्टाः स्वीयं प्रभुं प्रार्थयन्ते । रविवासरेऽत्र बहवो जनाः प्रार्थनां समाचरन्ति । ख्रिष्टानामाचार्यास्तु नित्यं नियमेनात्र द्वयोः सन्ध्ययोः प्रार्थयन्ते । स्वस्य धर्मगुरोः उपस्थितौ ख्रिष्टानां विवाहा अपिअत्रैव निर्वर्त्यन्ते ।

शिष्याणां सिक्खानां वा प्रार्थनास्थानं गुरुद्वारमुच्यते । शिष्याणां मन्दिरेषु पूज्यदेवस्य मूर्त्तिर्न भवति, ते गुरोः ग्रन्थस्य पूजां कुर्वन्ति, गायन्ति च तस्य चरित्रगुणानि कीर्तनानि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्येऽपि धर्माः सन्ति देशेऽस्माकम् । तत्र तत्र भक्ताः जनास्तेषां देवानां पृथक् पृथक् पूजामुपासनां भजनं च कुर्वन्ति । एकस्यैव त्रिभुवनस्य कर्त्तुः जगतः पितुः इमानि पूजास्थानानि जनानां रुचिभेदात् पृथक् पृथक् सन्ति । एकस्यैव बहुधा पूजामारचन्ति लोकाः ।

ईश्वरः एक एवास्ति विभुः सर्वत्र वर्तते ।
रुचिभेदेन लोकानां पूजितः स पृथक् पृथक् ॥

—o—

LAST WORD IN
FASHION FABRICS

ASHOK

- Sarees
- Velvet
- Suitings
- Brocaders
- Embroideies
- Shirtings

—:AVAILABLE A:—
ASHOK SILK MILLS
REAIL SHOP
406, Lalsingh Bldg., Near Crawford, market,
Sheikh Menon Street, Bomday-2.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

113505

आम्रम्

आम्रफलम् उत्पाद्य ईश्वरः जगतः महान्तमुपकारमकरोत्। आम्रं प्रायः सर्वत्र पृथिव्याम् उद्यानेषु जायते। तस्य वृक्षो महान् भवति पत्राणि च वितस्तिमात्रं लम्बानि चतुरङ्गम् आयतानि च भवन्ति। अयं वसन्ते फुल्लति दधति च हरितान् शलाटून्। वर्धितास्ते च वैशाखे आम्राणि सञ्जायन्ते। ज्येष्ठे आषाढे च मासे तानि परिपाकं प्रयान्ति। सुपथ्यानि स्वादूनि मधुराणि च भवन्ति पक्वानि आम्राणि। भारतेऽस्मात् प्रचुराणि आम्रफलानि भवन्ति। तेषां बहूनि नामानि जातयश्च सन्ति। महाराष्ट्रे लक्ष्मणपुरे वाराणस्यां विहारे च उत्तमजातीनि आम्राणि जायन्ते।

जनाः पक्वानि अपक्वानि चापि खादन्ति आम्रफलानि। तैः सन्धानकम्, अम्लकम्, चुक्रम्, शुक्तम्, आम्रपानीयकम् आम्ररसं च कुर्वन्ति जनाः। यानि चातिशयं स्वादूनि गुणकराणि पथ्यानि च भवन्ति भुञ्जानानां जनानाम्।

अर्धपक्वमपि आम्रं गुणकृत् भवति। पक्वं तु तद् रक्तविकारं शमयति क्षिणोति वातदोषम्, पित्तप्रकृतिं च। इदं दीपनं पाचनं रुचिरं सन्तर्पणं बलप्रदं रासायनं प्रमेहघ्नं च भवति। आम्राणि चूषन्ति जनाः। तानि बालानां चातिशयं प्रियाणि भवन्ति।

केचित्तु जनाः 'आम्रम् उष्णपरिपाकं व्रणकरं च भवति' इति वदन्ति, तत्तु न तथ्यम्। 'आम्रं शीतमपित्तलम्' इति वाग्भटोक्तेः। बलवृद्धये रक्तोपचयाय च आम्रम् उत्तमं फलम्। पक्वस्याम्रस्य नित्यं सेवनेन देहः पुष्टः स्वस्थश्च संजायते जनानाम्। आम्ररसभोजनः तदनुदुग्धपानश्च जनः, दुर्बलः बलवान्, अलसः स्फूर्तिमान्, मूर्खः बुद्धिमान्, कुरूपश्च रूपवान् संपद्यते। चूषितं भक्षितं चाम्रं जाठरानलं संधुक्षयति, मलबन्धं शातयति, कोष्ठं पचते, पित्तं पिनष्टि क्लिष्टं, कर्षति, वातव्याधिं व्यापादयति, सम्पादयति च सुरुचिं सेवमानानाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

आम्रं बहुगुणोपेतं फलराजपदे स्थितम्। कन्दमस्ति स्वादु सृष्टं लोकहितैषिणा॥

113505 Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्तयः

---०---

मन्दो रक्षासु वस्तूनां नाशे शपति तस्करम् ।
अङ्गणं शंसते वक्रं नर्तनाकुशलो जनः ।
यत्रत्यो यादृशो राजा तत्रत्याः तादृशी प्रजाः ।
गतानुगतिको लोको न लोकः पारमार्थिकः ।
आम्रोद्यानस्य रक्षायां कोऽनु युञ्जीत वानरान् ।
काले कृतानि कर्माणि फलन्त्यदभ्रम् ।
सम्मीलने नयनयोर्नहि किंचिदस्ति ।
विद्या कामदुधा धेनुः सन्तोषो नन्दनं वनम् ।
प्रारब्धमुत्तमजना न परित्यजन्ति ।
यो यत्र कुशलः कार्ये तं तत्रैव नियोजयेत् ।
वर्तमानेषु कार्येषु प्रवर्तन्ते विचक्षणाः ।
एके जल्पन्ति भूयिष्ठमनुतिष्ठन्ति चापरे ।
चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
अशक्तोऽहं गृहारम्भे शक्तोऽहं गृहभञ्जने ।
सर्वारम्भो हि दोषेण धूमनाग्निरिवावृतः
दीपो भक्षयति ध्वान्तं कज्जलं च प्रसूयते ।
म्रियन्ते युधि योद्धारो लभन्ते भूभृतो जयम् ।
उद्योगस्य समृद्धेश्च नातिदूरं समागमः ।
अशक्ताः तत्पदं गन्तुं ततो निन्दां प्रकुर्वते ।
उलूखले शिरो दत्वा मूसलेभ्यो भयं कुतः ।
अन्धा यत्र प्रपिपन्ति तत्र खादन्ति कुक्कुराः ।
खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।
अवश्यं श्रद्दधानस्य फलति प्रत्ययो दृढः ।
महादन्तद्वयी भाति मातङ्गस्य महामुखे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar